रसगंगाधरटीका

२५३

३३ पत्र

३३ पत्राणि

१०

रसगंगाधरटीकाउद्योत



रसगंगाधर व्याख्ये थं भ्रा रंभान

ना ३

श्री० १ श्रीगणेशाय नमः ॥ रमणीयार्थप्रतिपादक इति । घटमानमेति वाक्यवारणाय रमणीयेति । कटाक्षादिवारणाय शब्द इति । व्यं
ग्यादिसंग्रहाय वाचक इति नोक्तं । रमणीयशब्दप्रतिपादकशब्दे व्याकरणादिरूपेऽतिव्याप्तिवारणाय यार्थेति । लोकोत्तरेति वि
शेषणाकृत्यमाह पुत्रस्ते इति पाल्ये चिच्चमत्कारजनकज्ञाने समूहालंबनविधर्मोसमानाम्यर्थप्रतिपादकशब्दे काव्यत्ववार भा
णाय ज्ञानेति । अपहाय मानवृत्तेन्युक्तं । धारावाहिकसकलज्ञानविषयतादृशार्थप्रतिपादकेति व्याप्तेराह पत्न्यतिनेति । पादृ
शानुपूर्वीप्रतिपादितार्थविषयकत्वाविशिष्टभावनात्वतज्जनकतावच्छेदकं तादृशानुपूर्वीमत्त्वमित्यर्थः । लाघवादाह
स्वेति । स्वं चमत्कारत्वे । लक्ष्यतावच्छेदकं चैतत्समानाधिकरणाः काव्यत्वापघनुगतव्यवहारेणास्वादजनकतावच्छेदकजातिमाव
सिद्धजातिविशेषरूपं अखंडोपाधिभूतं वा काव्यत्वं बोध्यं । लक्षणे गुणालंकारादिनिवेशोपि न युक्त इति । एवमदोषावित्यप्यु
क्तं । दोषसामान्याभावनिवेशे काव्यव्यवहारस्य विरलविषयतापत्तेः दुष्टं काव्यमिति व्यवहारानापत्तेश्च । न च दोषप
देन स्फुटदोषराहित्यं विवक्षितं । स्फुटत्वं शाब्दबोधप्रतिबंधकत्वं तेन निशाकांतस्तलानासत्त्वेऽगत्यत्ते ० अन्यथा रसादि रस० १
दोषाणां त्यागे वीजानापत्तिः न ह्यदोषो शब्दार्थावित्युक्ते रसादिदोषाभावः प्रतीयत इति वाच्यं अर्थपदेनु नरसास्यापि
ग्रहादिति तदाह दुष्टं काव्यमिति व्यवहारस्येति ० शौर्यादिवदात्मधर्माणामिति । उत्कर्षाधायकत्वेन साम्यं । न तत्रममेवेति ।

एवकारेण कश्चित्त्रितयस्यापि कम्रणत्वमिति ध्वानयति । त्रिलक्षणात्त्रितयजन्यप्रतिभावातिपिलक्षणात्तज्जन्यकाव्यं चा
तिविलक्षणमेवेति नद्रो षष्ठीति दिक् । उपाधिर्वेति । जातित्वपरित्यागेन तत्वांगीकारे वीजं चित्यनीलघटत्वादिवत्सखंडो
पाधिरेवेति वार्थ वस्त्रअखंडमिति पाठस्तु चिंत्य एव तेनातिगरुड स्फुटव्यंग्यचोर्निरासः इति । असुंदरतित्वस्य चेत्यपि वो
ध्यं । गुणीभवितान्मानाविन्यनेनाप्यस्य निरासः इति ध्वनयति तु ह्योरेवेत्युक्तिः एवं संदिग्धप्राधान्यतुल्यप्राधान्यकाक्षि
प्तानामपि वोध्यं । त्रपोत्सुरूक्ष्यादेश्च व्यभिचारिण इति । दरेत्यनेन त्रपाव्यंग्यानिरीक्षणेन चोत्सुकत्वमिति वोध्यं । क
ध्यमपि वाच्यहेतुत्यनालिंगितस्येति । ध्वनिपिषये एवैतत् । स्पष्टश्चापमर्षश्च गरुडस्य व्यगुणीभूतव्यंग्यनिरूपणावस
रे पंचमोद्गाररसद्दोषनिरूपणेऽस । त्रमोद्गारसेच । व्यंग्यस्यनाच्चीकरणोवमनाख्यदोष इति प्राचः । केचित्तु नन्वत्र पक्षेवा ५६
च्यत्वेन तद्वद्व्यंग्यपर्यायान्तुव्यंग्यं न तयोश्च्युत इत्यादि सूर्यापोक्तप्रकरणस्य गंधविरोधोत आह । चुंवने छायाश्रति । संश
पालंकारनिरूपणे स्फुटतरमेतद्दृष्टे भविष्यत्कृतवानसीन्यर्थसंवलितत इति । अस्याप्यमर्षप्रतिगुणत्वेन तत्कार्मत्वात् । अ
न्यच्च पर्यायकथंचिदंगीकुर्विति अर्थापत्तिप्रमाणस्यातिभक्तस्याभावादिकिभावः । दुःखदानत्वरूपेण स्थित इति पर्यन
स्यतीति च । अधमपदप्रवृत्तिनिमित्तस्य सकलाधमसाधारणस्यैकस्याभावात्तत्तद्धर्मा एव तत्र तत्र प्रवृत्तिनिमित्तत्वात् पार्श्वी

श्री
२

कार्मा: प्रकृतेनु दुःखदात्वरूपो धर्मस्तत्र च वाच्यकक्षायां दुःखत्वेन रूपेण पराधीनतरनिमित्तं दुःखं प्रकरणादिवशाद्दृष्ट क्रीमध्यमा
सतेव्यंग्यकक्षायां तु हृतीसंभोगनिमित्तकदुःखत्वेन दृतीसंभोगनिमित्तकं दुःखमिति भावः व्यंग्यांतरमादाय च गुणीभूतमि
ति अपरांगोदाहरणोपंसरसनेत्यत्रापि वाच्यापेक्षया शृंगारस्यैव प्राधान्यं श्लोकोत्कर्षकत्वात् शृंगाररूपव्यंग्यापेक्षया वाच्यस्यै
व चमत्कारित्वात् एवं समन्तत्रापरांगोदाहरणे स्पष्टं सवाष्पगलज्जलतदुक्तालापानीगंमनोत्तरचिरकालावस्थितिनिवा
रकत्वमाप्युपपत्ते व्यंग्यसहितानामेव गमनननिवारणसामर्थ्यमत आह अस्त्रूवानंततः परं प्राणानिति अत्र गलितकंव
ग्यमादायैव ध्वनि गुणीभूतव्यंग्यव्यवहारस्य सत्वेन विप्रलंभेन ध्वनित्वं कोनिवारयेदिति चिंत्यं अन्यथा यामतद्गुणामि
का
सादिप्रदेशाद्युदाहरणानामप्यसंगत्यापत्तौ व्याकुलीस्यात् गोत्रात्रेइति च तु र्थ्यंतेत्वं जंतस्वसमुचितललितेति नत्तद्र
ससमुचितेत्यर्थः अत एव ललितशब्दो बोध्यं सहकारिभिन्नत्वेत्यस्य चर्व्यमाणो रितिशेषः स्वस्वरूपानंदाकारेति तद्विष
येत्यर्थः समाधौ सविकल्पकसमाधौ निर्विकल्पकसमाधौ तदंगीकारात् चित्तवृत्तिरिति साच काव्यव्यंजनामलेति
बोध्यं अनंततःकरणावृत्तिरूपत्वादिति अंतःकरणावृत्यवच्छिन्नचैतन्यारूपत्वादित्यर्थः अस्या वृत्तेर्निरवच्छिन्नविष रा.म०
यकत्वादिति भावः चर्व्यमाणो रस इति प्राचीनव्यवहारोपपत्तये आह० चर्वणाचास्मेति नाटकत्वेनेति संबंधराहित्ये २

त्यर्थः नवममन्तेस्वप्नर्वोपस्थितेनेरत्यादिनेति · दुष्यंततादौगृहीतशकुंतलादिरित्यादिनेत्यर्थः दुःखप्रतिवंधकत्वम
प्रीति · सुरतकालिकदंतताघातस्यवेत्यर्थः अनुकर्त्तरिनटेसमारोप्येति श्रव्यकाव्येतुकाव्यपाठके इतिबोध्यं · तदाप्र
क्तनेपितुल्यमिति · नचशांतस्यरोमांचादिविरहेणानभिनेयत्वात्कथंनाट्येसरइतिवाच्यं · सर्वचेष्टाराहित्यरूपेणैवतद
भिनयसंभवादित्याहुः वद्धव्यविभावजत्वेइति · बहुविपुलं · विभावशब्दोवासाहचर्यादिभावानुभावव्यभिचारिपरः
अतएवरत्नाकरेवहुवचनं · विरहात्स्पेर्ष्याशापाइति · आदिसंगाभावेपिगुरुशापवशादिजन्याभिलाषेइष्टारूपेस
तितदप्राप्तौयः सोभिलाषहेतुकउच्यते · गुरुलज्जादितः संगमप्रतिवंधोविरहः ईर्ष्यात्मनाशब्देनमानहेतुकउच्यते प्रिये
सपत्नीरक्तेकोपईर्ष्या · तत्कृतोपुरागुपुदोणशेयोस्यपा · शापोयथाशकुंतलादेर्दुर्वाससः अत्रप्रपंचः सर्वोपीति · अनि
त्यत्वेनज्ञातइत्यादिः अन्यत्रगुरुरूत्सभरपोसतीति · अन्यत्रक्रोधाभावे · लक्ष्यतावच्छेदकेचैकविंशतिवारान्निःक्षत्रियवसुम
तीकारकत्वंचित्राज्ञयाभार्गवत्वंवा · मेइत्यर्थंतरसेक्रमितेति · अनेकशोरणोपुक्षततजर्जरशमन्तकलेवरत्वंलक्ष्यतावच्छेद
कंसकलराज्यकोशादिदातृत्वंवारविकुंतीसुतत्वंवा · नुभाविनोश्रुमादिभिर्व्यभिचारिभिरिति · कोपामर्षौपर्यायौ · ईर्ष्यादि
मागुरोपुदोषारोपोस्यरूपेतिभेदः ईर्ष्याजनिकाचास्यपेतिव्यंगपत्वमेवास्याः नुभाविनोहर्षादिभिरिति · प्रमोदःसुखतदं

श्री॰
३

शावरणाभंजकश्चित्तवृत्तिविशेषो हर्षः अतो न वाच्यता व्यभिचारिणा इति बोध्यं॰ एतेन त्यागः सत्त्वेति॰ उत्पत्तिर्जमदग्नितः स भगवा
न्देवः पिनाकी गुरुर्वीर्यं न तु नपद्धि राम नु पद्यं व्यक्तं हि तत्कर्मभिः॰ त्यागः सप्तसमुद्रमुद्रितमहीनिर्व्याजदानावधिः सत्यब्रह्मतपो
निधेर्भगवतः किं किं न लोकोत्तरमिति॰ प्रतीता यां वा तस्यां विस्मयस्येति॰ षट्काणादिपर्यालोचनयेति भावः॰ न पुष्यत इति॰ विस्मय
स्योद्भटत्वादिति भावः॰ हृत चेतनेन सनेनन्नाता तस्यैव प्राधान्यप्रकटनाच्च॰ शृंगाराद्भुतयोश्चाविरोध इति॰ अन्ये त्वदासीनाः मध्या
शांताद्भुतौ वीरबीभत्सौ चेति ध्येयं॰ न रसास्वाद इति तयोर्हेयत्वमिति॰ तद्विषयकासम्यक्प्रत्ययमविलंबप्रत्ययमयोरित्य
र्थः॰ शिरःसिंदूरसरणिस्त्रीणामारक्तकस्यन्तमिति हत्वा युधः तस्योत्तरस्तत्र गतकमेणोति पद्यस्येति॰ दीप्यात्मविस्तृते हेतुरोजो
वीररसे रौद्रे चेति॰ बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेणात्वितु तरस्तत्र॰ अतो न व्यवहारातिप्रसक्तिरिति॰ इदमपरमत्र बोध्यं
आह्लादकत्वरूपमाधुर्यमस्याह्लादरूपे रसेऽस्तीति॰ कथं वक्तुं युक्ता॰ शब्दवृत्तिज्ञानपेगुणालंकारयोर्भेदस्त्वेवं॰ काव्यशोभाका
रिणो गुणाः तदतिशयहेतवोऽलंकारा इति॰ अत एव वामनः पुवन्तेरिव मंगकाव्यस्य दनेशुद्धगुणांतदप्यतीव॰ विहितप्रणामं
निरंतराभिः सदलंकारविकल्पकल्पनाभिरिति॰ आसमाप्तेरीत्यभेद इति॰ रीतमश्चवडपनागरिकापरुषा॰ कोमलाः एताए
वक्रमेणावैदर्भीगौडीपांचाल्यऽच्येतेमाधुर्यव्यञ्जकवर्णा पुनात्राद्या ओजोव्यंजकवर्णा पुनाद्वितीया॰ उभयव्यंजकातिरि

राम॰
३

क्के वलप्रसादयुक्ता प्सरांस्या इति विवेकः अत्यायाएव मा स्येति संज्ञाकेचांचित् · संयोगापरह्रस्वेति · संयोगश्चात्र परसवर्णा
न्निष्पन्नझल्पर एव · स्पष्टं चेदमत्रैवाग्रे · एवं क्रियापरं परापाविदग्धचेष्टितस्येति · यथा दृष्ट्वैकासनसंस्थिते प्रियतमे पश्चादु
पेत्यादरादेकस्यानयनेपिधायविहितक्रीडानुबंधच्छलाई षद्वक्रितकंधरः सपुलकस्वेदोद्गमोध्वसन्मानसामंतर्हासलसत्क
पोलफलके धूर्त्तोपरां चुंवति · अत्रैकामतिकस्याप्याचुंवनेविदग्धचेष्टितं · तस्यास्फुटत्वमनपात्तदृत्तानात् · तत्रोपत्निश्चन
पनपिधानपूर्वकं क्रीडानुवंधः आसां च पश्चादागमनेनयनपिधानक्रीडाकरणादिक्रियाणां परंपरयासामानाधिकरण्य
काव्येनिवद्धं · इदं च परंपरयेति तत्तीमांसपाठेवोध्यं ग्राम्यत्वकष्टत्वयोस्त्यागादिति · अत्रेदं चिन्त्यं कष्टत्वमोजोव्यंजकवर्णा
त्वं सुकुमारत्वं मारत्वं माधुर्यव्यंजकवर्णत्वं तयाचानयोः परस्पराभाववत्वाभावाल्लकधंतेनान्यस्यान्ययासिद्धिरिति · गुणमे
दायत्तेरिति एतेन चमत्कारानुगुणत्वरूपस्य वैचित्र्यस्य गुणत्वसाधकत्वेसपास्तं · राकापतिर्जेष्यतीति · पीडादानेनेति भा
वः मानमालिनत्वमुखसादृश्यस्य स्वस्मिन्संपादनेनवा · राकापूर्णिमा · अन्यथानु चंद्रः सर्वथासाम्याप्रसक्तिरितिभावः।
नदीर्घादव्यवहितपर इति परसवर्णेनैवव्यवधानादितिभावः असह्यत्तुसुतरामिति · भिन्नपदगतस्यसंयोगस्यदीर्घा
नंतर्ममसत्केच्चेत्सुतराम श्रव्यमित्यर्थः अस्तुवा प्राधान्येन ध्वन्यमानस्यापीति · संप्रति गुणीभूतत्वेपि वाच्यातिश

श्री० ४ वा

पित्वात्तद्ध्वनित्वं रागानुगम्यमानविवहनप्रवृत्तमत्यस्यैव रसापेक्षयापितस्य प्राधान्यमस्तीति भावः। व्यञ्जकचर्वणादिविषयत्वा
च्चित्तवृत्तित्वाच्चेति। अत्रैवानुभावभिन्नत्वे सतीति विशेषणादाने को दोष इति चिंत्यं। न चेपि स्मृतित्वेन स्मृतेरिति। व्यंग्यस्य कथ
मपिशाच्यवृत्त्यनालिंगितस्यैव चमत्कारित्वमित्यालंकारिकसमय इति पूर्वतनं ग्रंथेन विरोधाच्चिंत्यमेतत्। व्यंग्यतावच्छेद
कतया भासमानजात्यादिरूपेणाम त्र वाच्यतात एवाचमत्कारितापूर्वोदाहरणे हि मनोरथत्वे छात्वमोर्घटत्वकलशत्वव
द्विकतया तेन रूपेणैव वाच्यतास्तीति न दोष इत्यपि कश्चित्। उत्तमे पुरुषे स्वापोनुभाव इति उत्तमसत्वः प्रहसति गायति
तद्वच्च मध्यमप्रकृतिपरुषवचनाभिधापीशेतेरोदिसधमसत्व इति प्रदीपविरुद्धमेतत्। मदभाव एव प्रधानमिति। ननु स्त्री
वपदेन विशेषणाविधयावाच्यस्य नद्दस्य कथं ध्वनित्वं तास्पदत्वम्। कथमपि वाच्यवृत्त्यनालिंगितस्यैव व्यंग्यस्य चमत्का
रित्वमिति स्वयमेव प्रागेवावेदनादत आह। इदं वा पुनरिति। स्वप्रध्वननमत्रोदाहृतमिति। अस्यापि वाच्यातिशायित्वा
द्वेत ध्वनिव्यवहारोपीति भावः। जलाहरणाकर्तृत्वेन बोधकवारिवाहपदस्य सत्वादाहरणे विस्वप्रभावप्रशमेनेति। रा०म० ४
जोषं जोषमिति। निर्निमेषं दृष्टादृष्टेत्यर्थः। नयनाहरणप्रनिर्निमेषनिरीक्षणतो इति। इदं च सेवार्थकजुषाणमुलाचग
म्य। हर्षाद्यनुभावानामिति। तज्जन्यानुभावानामित्यर्थः। अमर्षध्वनावुग्रतामात्र प्रतीतेरिति अस्यां वधादीच्छापि न

तस्मिन्नित्तिमेद इति भावः संचारिणीत्वेनैवभेदादिति · गुरुर्वंधुवधादिजन्यस्यामीवागपरा धीदिजन्ये संचारीति
मेदमाकुर परो। अर्थजत्वरसे क्रमितत्वात्स्य ध्वनिरनुग्राहक इति · लक्ष्यमानत्वच्छेदकं चकर्णादर्शनावधिज्ञातिविलंबएकादशा सो
वन ३ हिरणीपतिवंघत्वे पांडुवानोवासादिवदात्त्वेवा आत्र दुःखितत्वेव्यंग्यं · उद्वेगावेगोपपत्यौ · कथामित्यपिविवक्षितेति · सुर
तपरं · तथापिकार्यकारणमोक्षस्यत्वादिति · असूयाकार्यकारणमोरिवामर्षकार्यकारणमोरपिविद्यमानत्वादित्यर्थः
कंपवानः श्वसनिति · श्वासजन्यकेन वानित्यर्थः भेनत्वमस्तिभावितइति · उत्पादितइत्यर्थः अवस्तादिभिर्जनितिनेति · गा
दिनाविरहादमः स्वन्निमित्यागात्यागाभ्यामिति · स्वत्यागेनविषयविघयो · हतत्वे · अत्यागेनचास्यालोकोकरत्वेक
ज्यतेइत्यर्थः भावयोः सामानाधिकरण्यमिति · एकदेशवृत्तित्वविशिष्टैककालवृत्तित्वरूपं मत्स्यभेदस्त्वकिंचित्क
रः शवलातामांत्वेकदेशवृत्तित्वरूपमेवसामानाधिकरण्यमितिविशेषः · विषयइति त्वामिनवगुप्तपादाचार्या
इति · वक्तृवैशिष्ट्यप्रकरणादिज्ञानसहितस्यैवव्यंजकत्वात्तत्सहितविभावादिज्ञानोत्तरंजायमानरसप्रतीतेर्विभा
वादिज्ञानापेक्षमाविद्यमानक्रमालक्ष्यतोनचालक्ष्यक्रमत्वं · तच्च प्रकरणादिज्ञानविलंबेनविभावादिज्ञानविलंबे
पिपूर्वोदाहरणेऽक्षतमेव · नहिविभावादिज्ञानस्यतज्जनकस्यचक्रममादायालक्ष्यक्रमत्वं · अपितुतज्जन्यस्य · एतदेवा

श्री॰ ५ मित्रेत्यर्थशक्तिमूलस्य द्वादशभेदा रत्यभिनवगुप्तोक्तिः न किंचिद्वाच्यार्थापेक्षक्रमोपि स्यादित इति लक्ष्यक्रमत्वो
क्तिरपि मयाकथंचित्रेपा· नहि विभावादिप्रतीतिरहितं यत्किंचिद्वाच्यार्थ[illegible]मूलस्य द्वादशभेदा रत्यभिनव मात्र
प्रतीतौ विगलितवेद्यान्तरतासहृदयानुभवसाक्षिकी येन तत्क्रमग्रहे तेपि रसत्वहानिः स्यादिति न व्या· उपपत्तिस्तु व्यर्थेत्यभिवि
चारणीयेति· विभावादिप्रतीतेरसप्रतीतेश्च विद्यमानस्यापि सूक्ष्मकालान्तरत्वरूपस्य क्रमस्य सहृदयेनाकलनेन तस्य विग
लितवेद्यान्तरतानापत्त्या रसत्वभंगापत्तेः विगलितवेद्यान्तरत्वं च सहृदयानुभवसाक्षिकमिति उपपत्तिर्बोध्या॰ इंद्रिमत्रे
पेक्षति घ्राणरासनश्रोत्ररूपोरागादिभिरपीति· रसस्येतिशेषः तथाभूतेनैव प्रतिमेति· वस्त्वलंकारात्मनेत्यर्थः पृथ
ग्भेदप्रयोजकतानुपपत्तेरिति· प्रौढोक्तिविषयाच्छिशक्तिविषय एव कच्युक्तिविषयात्तन्निबद्धोक्तिविषये चमत्कारस्या
धिक्यात्स्वरूपयुक्तिः ततः परं च प्रतिधानसाध्यप्रतीतिकतयाचमत्कारस्याधिगमनात्तेषां भिन्नाभिन्नतादेः पृथग्गणनेति न व्याः
तदात्मकपदज्ञानेति· तात्पर्यज्ञानात्मकेत्यर्थः व्यक्तिज्ञानस्योत्तेजकत्वादिति· बोधकताविशेषः शक्तिः तद्विशेषो लक्ष
णा तद्विशेषो व्यंजनेत्यालंकारिकसमयः तज्ज्ञानं च शाब्दबोधे हेतुरित्यपि प्रायः न्यायानुसारिणी येन मतेन नानार्थस्थले राम॰
पीति· बाधज्ञानायोग्यताज्ञानेन शाब्दबोधप्रतिबंधके· योग्यताज्ञानं च न कारणं आहार्यो वा बोध इति यत्नः उपमायानुसा ५

कदाचित्स्यादपीति। तादृशद्विजीपार्थमादाय वाक्यस्यासंदिग्धार्थकत्वमाप्नुयादिति कल्प्यमानोपमापात्रार्थोप
पत्तिवेद्यत्वसाम्यसंभवात्कदाचिदिति। असंदिग्धो संदिग्धवचने वा वेदाः प्रमाणं प्रतीतिवत्। जलजं न घनं मृगशब्दोऽप्य इति। दु
ष्टयोरैक्यात् जडजत्वेन मृत एव पुत्रता। न प्रतीति न पनमित्यनेन चोराणां मृगयं नीतिमृगा इत्यनेन गवेषका इत्यर्थलाभः मृग
अन्वेषणे इत्यदन्ताच्चुरादेः पचाद्यच्। यत्र तद्वाक्ये तत्तदर्थत्वपर्यवसानं प्रकारान्तरेण तदर्थवक्तुस्तात्पर्यग्रहस्तत्रा
प्तनामकाकेभ्यो दधि रक्ष्यतामित्यादौ तात्पर्यान्यथानुपपत्त्या लक्षणा प्रकृते तु न तथेत्याह नस्य पहत्त्वेव्यवहार इति। प्राप्ति
पत्त्येऽवश्यवाच्यमिति। अर्थापत्तिप्रमाणान्तरस्त्वेमानाभावादिति भावः। रामार्जुनेत्यत्रार्थान्तरविषयत्वेपीति। रामा
र्जुनन्त्यपराक्रमशालित्वामित्यादि अर्थान्तरं। लिंगत्वेकपदार्थः कोपादिरनन्वित इति। एकपदार्थ इत्यस्य विवरणं पदा
र्थान्तरेणानन्वित एवेति। एवं चासमस्तात्खंडेकपदार्थो दिनंगमिति फलितं। भवच्छेदनादिकं च भजनादिरूपमित्रप
दार्थान्वितमेवमवधर्मः प्रकृते च वैरित्वं त्रिपुरासुरान्वितमेव शक्यान्तरव्यावृत्तमतो न दोषः यद्वा। त्रिपुरारातिप
दस्य योगरूढत्वेन रूप्यर्थान्वितत्रिपुरासुरवैरित्वस्यैव प्रकृते तच्छक्यधर्मत्वे शक्यान्तरव्यावृत्तत्वं च योगमर्यादयोपस्थि
तपदार्थापेक्षमारूढ्योपस्थितपदार्थस्याभिन्नत्वं स्पष्टमेव सुधियां केवलत्रिपुरासुरवैरित्वस्य तन्मीघ्रमानम्भ स्त्वापिम

श्री० ६ त्वेनशंक्यांतरव्यावृत्तत्वाभावाच्च· एवंचैकपदार्थइतियथाश्रुतमेव· शाब्दत्वाशाब्दत्वाभ्यामिति· मधुकररणकमद्दक:
द्दाश्रयः कोकिलइतिहितत्रबोधः शाब्दः। सुहृत्स्वर्थयोरितिहृर्ययमुहृदोरित्युचितं· बोधकवैचित्र्याच्चेति· कार्यकारणा
भावबोधकेत्यर्थः अमुंदरत्वात्काव्यप्रवृत्त्युद्देश्यतयाचेति· अन्यथानानार्थशब्दघटितकाव्यकरणारूपकरणारूप
कविप्रमासानर्थाक्यापत्तिरितिभावः समासोक्तेरिवास्यापिप्रभेदस्यगुणीभूतव्यंग्यत्वापत्तेरिति· अयंभावः विशिष्टस्यो
पमाशरीरत्वेपिऽपमेयांशस्यनव्यंग्यत्वंशक्त्यैवतल्लाभात· एवंचतत्कूटकव्यंग्यांशस्यतत्कूटकवाच्यांशादनतिशायितत्वे
नगुणीभूतव्यंग्यत्वंदुर्वारमितिभावः अत्रवदंतिअलंकाराणामुद्दीपनशविधयारसाद्युपयोगित्वेनालंबनापेक्षमोद्दीय
नेऽधिकचमत्कारित्वस्यसर्वानुभवसिद्धतयाकरत्वेतिपदवाच्यालंबनविभावापेक्षयात्रातिशायितत्वाध्वनित्वमव्या
हतमेव· रसापेक्षमागुणीभूतव्यंग्यत्वलिष्टमेव· समासोक्तौत्वागत्यसंप्रतिवियोगविसंष्टुलांगीमित्यत्रसखीशिक्षा
वाक्येऽप्रकृतनायकवृत्तांताध्यारोपंविनातदनुपपत्तेर्गुणीभूतव्यंग्यत्वस्यापत्वंस्पष्टमेव· यत्रतुतस्यापिइत्याद्युपस्का
रकवपीवाच्यातिशायित्वंप्रागुक्तरीत्यातत्रास्त्येनामध्वनित्वंतस्यइति· नचैवमप्युपमाकृतोत्कर्षमादायास्तुध्व· राम०
नित्वंअलंकारध्वनिरितितुकथं· अलंकारकृतोत्कर्षध्वनामेवतत्ध्वनिव्यवहारात· विधीयमानेकपदादिति· विधीय ६

मानत्वमुच्चार्यमाणत्वं । सुवासितप्रवाहेतिशोभनं वा । संजातं यस्य तादृशः प्रवाहो यस्या इत्यर्थः । न तथात्वमिति ध्वनित्वमित्यर्थः । वा
लेवारयपंपायस्येति । वालेइति पदेन व्यंग्यस्य वाच्यापमानताकरणादनुचितमेतत् । नास्ति तुल्यकक्षतेति । एवं चाच्छाद्याच्छादकभाव
न विवक्षितत्वादीदृशवाक्यभेदइष्टापत्तिरिति भावः । शत्रुविरुद्धस्य शत्रुत्वासंभवादिति । विरोधिशत्रोर्विरोध्यंतरमित्रत्वादेकस्य वि
रोधिद्वयकर्तृकहननकर्मत्वायोगेन तादृशहननकर्मत्वयोरपि विरोधादिति भावः । शत्रोर्विहता ज्ञातत्वमादाय कोपस्या
तिशयितत्वमादाय वा तत्परिहारः । अशनिरित्यत्र नत्र विरुद्धार्थकः । न चैवं विरोधस्यैकपथे व्यंग्यता । तन्मूलकहनन
कर्मत्वयोर्विरोधस्य व्यंग्यत्वेनाक्षतेः । तमादायैव च विरोधाभासः । तस्यैव समाधानात्तनत्वं न योर्विरोधस्य समाधानमस्ति ।
एतेनैकधर्मिगतत्वे एव विरोधस्यालंकारत्वान्नात्र विरोधालंकार इति परास्तं । तादृशकर्मत्वयोरेकधर्मिगतत्वस्य स्पष्ट
त्वात् । अन्ये तु विरोधिनोरप्येकशत्रुसंभवान्न तादृशहननकर्मत्वयोर्विरोध इत्याहुः । द्वितीयार्धे चानुगतदार इत्यर्थे न तत्
त्परिहारः । अभावाद्व्यंग्यत्वस्य चोपपत्तेरिति । शापितास्वविधे इत्यत्र व्यंग्यतावच्छेदके छायात्वरूपजातिरूपेणोपमनोरथ
पदेन बोधनात्तत्रपर्वगं [illegible] यविरोधः । मनोरथत्वे छायात्वयोर्घटत्वकलशत्ववदेकत्वात् । इहतु भ्रांतित्वसानंदावलोकनत्वयोर्व्या
प्यव्यापकभावेन भेदात् । रूपसामान्यशब्दत्वं । सामान्याभाव इत्यर्थः । भेदानां चतुर्णामलंकारान्तमिति । रूपकातिशयोक्ति

श्री० हेत्वलंकारात्मनेत्यर्थः अजहत्स्वार्था जहत्स्वार्था चेति । अनयोरेवोपादानलक्षणा लक्षणलक्षणेति व्यवहारः । वाच्यगतत्वैक्षापादिनल
७ क्ष्य इति । तस्य वृत्तितया व्यापकमित्यर्थः ग्रामो जिकाकाचिदस्तीत्यत्र प्रमाणमस्तीति । प्रकृत्यादित्वात् धान्येन धनीतिवत्तृ
तीया यात्र मेदार्थकत्वेन न कश्चिद्दोष इति चिंत्यमेतत् सर्वमविषयविशेष इति अवधिरूपे इत्यर्थः केवलत्वमिह विवि
क्षितमिति । एवं च योगबोध्यार्थान्वयायोग्यार्थप्रतिपादकत्वं रूढेः केवलत्वं । एवं रूढिबोध्यार्थान्वयायोग्यार्थप्रतिपा
दकत्वं योगस्य तत्त्वं । परस्परं प्रतिपाद्यार्थयोरन्वयायोग्यत्वे संकर इति फलितं । विशकलितत्वयोः शिति पदांतरार्थेनान्व
य इति शेषः नाप्ययोगोरिति अनेनन्यवहारः पर प्रतिपाद्यार्थयोरन्वययोग्यत्वे संकर इति फलितं । विशकलितत्वयोरिति प मा
त्रे धर्मिज्ञानसाध्यमित्युच्यते अभावज्ञानेपि प्रतियोगितावच्छेदकविशिष्टज्ञानस्य प्रतियोगिज्ञानतावच्छेदकज्ञानस्य वा
हेतुत्वादित्याहुः तत्र त्समयभेदभिन्नेति । बालत्वयुवत्ववृद्धत्वरूपः यथा योगं लक्षणा शरीराणीति । लक्षणाज्ञानकार्य
तावच्छेदकं च तादृशशाक्यसंबंधप्रकारकलक्ष्यविशेष्यकशाब्दबुद्धित्वं तदनंतरं व्यंजनयातादृशशाक्यतावच्छेदकप्र
कारकलक्ष्यबोध इति प्राचीनालंकारिकसमतं । विशेषणाचंद्रसंबंधासंबंधाभ्यामिति मुखचंद्र इत्यत्र चंद्रपदस्य तत्स राम०
दृशे लाक्षणिकत्वेनैकपदार्थत्वात् संसर्गस्यापि लक्ष्यघटकतया चंद्रसदृशयोः संबंधस्य संसर्गविधयाऽभानात् चं ७

दसदृशमित्यत्र तु तयोर्भिन्नपदार्थत्वात्संसर्गस्यभानमावश्यकमेवेति भावः इत्येतदुक्तान्त्यपगलंकारतापत्तेरिति • इ
वस्य द्योतकत्वेन संसर्गस्याभानादिति भावः वाचकत्वेपि तेन सह प्रतियोगित्वसंबंधः चंद्रसदृशमित्यत्र तु चंद्रपद
स्य तत्प्रतियोगिता अपेलाक्षणिकेन यामेदस्यस्य संबंधत्वमिति स्पष्टं वलक्षणापसदृशवाचकत्वेपि स्वप्रतियोगिका
श्रयत्वं चंद्र इवेत्यत्र संबंध इति स्पष्टो भेद इति बोध्यं • ताद्रूप्यसंवेदनमिति ताद्रूप्यमात्रसंवेदनमित्यर्थः एतेन भेदा
भेदोभयप्रधानोपमात्र साधारणरूपेणाचोपमानोपमेययोर्भेदः साधारणरूपेणाभेद इति अलंकारसर्वस्वके
तयोरघविरोध इत्यपास्तं • रूपकस्य भेदः स्फुट एवेति • उपमायां च साधारणस्यैव गुणस्य प्रतीतिरिति भावः रूपके नास्ति
लक्षणेतीति • मास्तु लक्षणानामार्थमोभ्याभेदात्वप एवास्तु न च बाधज्ञानं प्रतिबंधकं सादृश्यज्ञानरूपदोषस्योत्ते
जकत्वात् एतज्ज्ञाने च प्रसिद्धसादृश्यकस्यत्वे साधारणधर्मानुपादाने एकसंबंधिज्ञानादपरसंबंधिस्मरणान्यायेन
साधारणधर्मस्फूर्तौ दोषविशेषसहकारेण शब्दादभेदप्रत्ययः शंखे पीतत्वाभावनिश्चयमेकावकामलादिदोषेण
तत्पीतत्वप्रत्यक्षवत् • रूपके आहार्याभेदबुद्धिरिति प्राचीनव्यवहारे बाधबुद्धिकालीनत्वमात्रे आहार्यपदे ला
क्षणिकं • इवशब्दादिसमभिव्याहारे तेनैव भेदगर्भसादृश्यस्यैवोपनात्राभेदप्रतीतिरिति चिंत्यं • महाभाष्यादिग्रंथाना

श्री० ८ ४

मिति॰ तथा च पुंयोगादाख्यायामिति सूत्रे भाष्यं॰ भिन्नानामेदात्कथमतस्मिन्स इत्येतद्भवति॰ चतुर्भिः प्र प्रकारैस्ताद्रूप्य
मारोप्यते तात्स्थ्यात् यथा मंचा हसंति॰ ताद्धर्म्याद्यथा जटी ब्रह्मदत्तः ब्रह्मदत्तकार्यकारिणि जटिन्यपि॰ सामीप्यात् गंगायां
घोषः साहचर्यात् कुंतान्प्रवेशयेति॰ अभेद एव रूपकमिति मतेपि सादृश्यमूलककाभेद एव तत्त्वं॰ एवं च प्रत्यर्थि
वेशो लवणाचिजयकारिस्मानदानां वुपदे॰ खड्गो मालवस्पेत्यादौ खड्गशब्दात्प्रतीयमानदानानुपदाभेदे चें शाभेद
प्रतीतिमूलकतज्जेतृसंबंधित्वरूपं साधर्म्यमूलं॰ प्रत्यर्थिषु नंशाभेदे च खड्गदानावुप्रतीपदाभेद प्रतीतिमूलक
तद्द्रुज्यमानत्वं तथेतिलक्षणाभाववादिनापि कथमन्योन्याश्रयः परिहार्यः किमर्थं वाश्लिष्टपर्यंतानुधावनं दी
क्षितैः कृतमिति चिंत्यं॰ मुखत्वादीनां च साक्षाज्ज्ञानमेवेति॰ एकपदोपस्थाप्यानामिति बोध्यं॰ सारोपानु चंद्रत्वस्य चंद्रस
दृशो भात इत्यारेति परंपरया तज्ज्ञानं॰ लक्ष्यतावच्छेदकास्फूर्तिस्त्वेति लक्ष्यतावच्छेदके च साधारणधर्मरूपाद्वादके वा
धेवैतन्मते बोध्यं॰ श्रीस्तु

रांम० ८

रसगंगाधरग्रंथस्यै कोनशततमपत्रमारभ्य व्याख्येयम्

अथोपमालंकारे· काव्यात्मन इति· काव्यात्मनो व्यंग्यस्येत्यर्थः· यद्देहमलंकारा इत्यनेनान्वेति· व्यंग्यपरमरणीयेत्यलंका
रसामान्यलक्षणं तयोः संगतत्वादिति· चित्रमीमांसोक्तोपमालक्षणदूषणावसरे· वर्णनपदस्य चमत्कारजनकज्ञान
विषयीभूतानुयोगित्वकत्वार्थतात्पर्यं आह कमिदं न तु लक्षणशरीरघटकमिति चेत्तत्राह किं चेति अलंकारोत्तीयोत
चाधितस्योपस्कारकत्वस्यालंकारसामान्यस्वरूपत्वेन विशेषलक्षणे युतदनिवेशेपि क्षतमभाव इत्यत आह· अतएव
पिचेति अत एव चित्रोपमालक्षणं त्विति नोक्तं तात्पर्यं आह कत्वस्योक्तत्वादिदमपि चिन्त्यमेवेत्य व्यंग्यत्वं च तल्लक्षणे
प्राधान्येनाव्यंग्यत्वं बोध्यमिति दिक्· रूपकानुगामीति· यद्यपि प्रसिद्धोज्वल्यशोभाविशेषादिकमादायापि अत्राचा
रोनुगामी शक्यते कर्तुं तथापि कविताल्पर्वीनत्पर्यविषयतास्येवेति बोध्यं· तादृशशोभाविशेषयोरैक्यप्रतिपत्तिम
चानयोर्बिंबप्रतिबिंबभाव आवश्यक [illegible]: विसर्जनमनुगामिनि हेतुरिति· तयोर्बिंबप्रतिबिंबभावं विनाभिन्नक
रणकत्वेन दूरविसर्जनभेद प्रतीत्यानुगामित्वमेव न स्यादिति भावः· लतोपमेपि कोपमानिष्पादिकेति· एवं च वा
क्यार्थोपस्कारिकोपमेयमित्यर्थः· समसदृशशब्दाभ्यां प्रतिपादिते बिंबप्रतिबिंबेति· यद्यपि समसदृशशब्दाभ्यां प्र
तिपादितोपमयोर्वस्तुप्रतिवस्तुभाव एव तथापि तद्विशेषणयोः शोणाधरनापि कास्तवकाननलतयोर्बिंबप्राति

श्री० ९ विंबभावश्चावश्यक इति भावः न योश्च विंबप्रतिविंबभावे सादृश्यानुयोगित्वमेव साधारणो धर्म इति बोध्यं । एवं तेनैव संबंधेनेति प्र
तियोगितासंबंधेनेत्यर्थः स्वधर्मीणां भेदानामिति । साधारणधर्मभेदसहितानां पूर्णालुप्तादिभेदानामित्यर्थः प्रतीयमानोप
मामरूपदेन ध्वन्यमानेति । अत्रोपमानस्योपमेयत्वकल्पनात्मकप्रतीपस्यैव व्यंग्यत्वं । मरूपदस्वारस्यात् किं हृष्यसीत्ये
तत्स्वारस्याच्च चमत्कारातिशयात्रेति केचित् । स्ववैचित्र्यमात्रविश्रांतेतिस्वोक्तिविरुद्धेति उपमासामान्यलक्षणस्यापि प्रकृ
तत्वेन तस्यैवायं विभागः ४ उपमानोपमेयतावच्छेदकयोर्भेदाच्चास्यैवोपमितिनिष्पत्तिः अत एव सेयमुपमेत्युक्तं नत्वलंकार इति
नयन्ते शिरश्शिरेकरोतु मे शरदिंदुप्रतिममुखं ततो वेत्यादौ उक्तार्थोपपादनपरैव । मुखकर्तृकनयनकर्मकशिरःशरीक
रणस्यैन्दूपमयैवोपपत्तेः उक्तार्थस्योपपादनेन तदतातिशयस्य हृद्यमप्युक्तार्थोपपादनमेवेति नदोप इति चिंत्यमेत
त् । उदाहरणालंकारोपमातिरिक्त इति । अदत्वामादृशो याभर्दत्वात्वंत्वादृशो भवेत्यमित धर्मिकोपमायामुपमानतो
पमेयतावच्छेदकभेदेनोपमितिक्रियानिष्पत्तेरुपमाव्यवहारस्य सर्वसिद्धत्वेन सामान्यधर्मविशेषधर्मयोर्भेदेनो
पमानिष्पत्तेः संभवादुदाहरणालंकारो मास्त्वतिरिक्त इति चिंत्यमेतत् । अन्योन्योपमापत्ताप्रूपस्यैवपरं परितस्येति । साव रम० ९
यवामं परस्परसमर्थकत्वेपि नोपापन्ताज्योत्स्नायां हासितत्वारोपविनापि श्रीउज्वल्यादिनासीतायां राकासाम्यसिद्धेः इह

तुसुमेरौमदिरागारत्वोपमानाविनाक्षीवेक्षुदेवोपमायां नाकिंचित्साधर्म्यं· तस्मिंश्च सादृश्यप्रतीतिमलाभेदमापन्नसुराल
यदृत्तित्वमेव तथा· सुमेरौमन्दिरागारत्वोपमायां चक्षीवद्देवयोरुपमानविनानसाधारणधर्म इत्यन्योन्योपायनं· अन्योन्या
अपपरिहारस्तु रूपकप्रकरणेव वक्ष्यते· आनुकूल्येत्युपमयोरेवेति· अनुकूलताख्यगुणो सत्त्वीत्यर्थः· स्थगतां हरयन्निय
त्रापि स्थगाधिपत्वादानुकूल्यमेव· उपमेयानां स्वस्वोपमानानुपमानानामिति· इदं विशेषणमुपमेयोपमायामतिव्याप्ति
वारणार्थं· अद्वितीयं स्वात्मानमिति· अत्र स्थादिपदाप्रयोगेपि किंचिद्द्वयसीत्यासेपमात्रेणास्तु याव्यापानवेतिस
इदयेविभाव्यम भविष्यत्कालावच्छिन्नशिशिरीकरणस्येति· एषु सर्वेषु भूतभविष्यत्तत्त्वपदार्थनामेवोपमानीकरणेनान्व
यस्य संभवाच्चित्यान्येतान्युदाहरणानि· सदृशानि वै देह मुक्तापुरस्तात्समुद्रनेमिं पितुराज्ञयेवेति तदाह तुमुचितं· चंद्रा
लोके तु अनेकस्यार्थयुगस्य सादृश्ये स्तवकोपमा· स्त्रितोस्मि चरणो विक्षोभंगस्तामरसोमया· स्यात्तस्य पूर्णोपमापत्र· द्व
योरपि विधेयता· पद्मानीव विनिद्राणि नेत्राण्यासन्हसमुखे इतिमेदद्वपमधिकं इत्युपमा॥ ॥उपमेयोपमायांतु लि
ङ्गसममित्युपमावाचकवैलक्षण्यं वक्ष्यमाणाक्लिष्टपञ्चादिवैलक्षण्यमिव दुष्टमिति चिंत्यं· इत्युपमयोपमा: द्वितीय
सब्रह्मचारित्व्यवच्छेद इति· अनन्वयप्यर्थनिबंधनाद्वितीयोपसदृशव्यवच्छेदः फलति· नहि धर्मान्तरावच्छिन्नस्वस्य ध

श्री०
१०
10

र्मांतरावच्छिन्नस्वेनसाधर्म्यमनन्वयि। अतएवोपमेयतावच्छेदकोपमानतावच्छेदकयोर्भेद एवसाधर्म्यं घटकोननुधर्मिणोरित्युक्तं
प्राक् एवंचानन्वयपर्यनिर्वचनप्रयोज्यद्वितीयसदृशव्यवच्छेदफलकसादृश्यवर्णनमनन्वयः एकोपमानोपमेयकत्वविशेषणंचा
त्रैनतात्पर्यग्राहकं स्वस्मिन्नन्वयेबाधकाभावादिति। सदृशांतरव्यवच्छेदाप्रतिपत्तावन्वयेबाधकाभावएवहेतुः एकपमानांत
रविरहइति। तत्राद्येस्फुटएव। द्वितीयेतद्ववदवस्यतद्वतरोपमयातस्यानिरूपमत्वंसिध्यतिअन्यथातत्सदृशपदार्थावयवेनैवैत
द्वयवस्योपमांदद्यात्। नतीयेपिप्रतिबिंबस्योपमानत्वकल्पनयान्यस्योपमानस्याभावोगम्यते अनन्वयध्वनित्वमत्रभविष्य
तीति। वद्यामार्धतद्धिणार्धमनुहरतीत्युक्तेनतांसानुहरतीतिभावः एवंचास्यहीत्यादिनोच्यमानंचिंत्यं। ईदृशावंगयव्यंज
नेऽन्यापापाभावइतिकश्चित्। सदृशांतरव्यवच्छेदेवाधानइति। कालांतरीणाप्रीतिव्यक्तिविशेषस्यसदृशस्यसत्वादितिभावः
प्रकृतेऽवाच्यत्वादिति। अवाच्यत्वेहेतुः प्रागदूषितत्वं। ननुत्वयादूषितत्वेपिमयानदूषितंतत्रहस्वयमिति। इत्यनन्वयः आनन्त्य
तिकोपमाननिषेधाभावादिति। संभवदुपमानत्वाच्चेत्यपिबोध्यं। ग्रंथचस्कंनेदमलंकारांतरमिति। अत्रोपपत्तिर्व्यतिरेकालंका
रप्रकरणेस्फुटीभविष्यति। इत्युपसमः। सामान्यार्थप्राधान्यमितितस्यापिप्राधान्यमित्यर्थः हेत्वंतरेति। जयगंधादिरूप
निदर्शनेपारदोत्रेतिश्लोकस्यात्रेत्यस्यार्थः पूर्ववाक्यार्थइति। पूर्ववाक्यार्थस्यतादृशः पारदएकदेशइत्यर्थः ननुक्रिया

रामं०
१०

रूपवाक्यार्थस्य द्व्यरूप· न्यारदः कु यमेकदेश इत्यत आह· प्रधानावयवस्यैवे· घटमानयेत्यत्रेति· कर्मणः सर्वमतेगुण
त्वादिभावः नीलघटवदिति चिंत्यं· अत्रोदाहरणे एकवाक्यतासत्वेपि वाक्यैकवाक्यतापर्व तस्माद्विशेषः परं वत्रानुपदेक
वाक्यत्वेनेति· इत्युदाहरणं· छित्तीयेनुलक्ष्यमिति· अधिरोहणे लक्ष्यमित्यर्थः जलधिमेघनस्य तैरसंग्रहः स्यादिति॥ सापप
पदस्य निपतस संबंधिकत्वेन संबंध्याकांक्षायामुपस्थितस्य मेमारणस्यैवान्वयापत्तिः नहि जनकत्वमला पन्यत्तेत्युक्तेमापी
पामवति अतो वस्तुतत्वरसमाश्रयेत्यानर्थकमिति चिंत्यं· नयंस्य तिरलंकार्यमनेति· अत्रस्यतेहोकासीत्यादिपदगम्यत्वेन वि
वहन प्रवृत्तरराजानुगम्यमानमत्यवतशठेनविधिनानिद्रादरिद्रः शंतद्यादेः शठादिपदगम्यामस्पावच्छतस्या एव प्राधान्येना
लंकार्यत्वं अनुपस्कारकत्वाच्चविप्रलंभस्यैवतत्वाच्चेति चिंत्यं· सर्वतोक्तिन्वधीदितिङीबीति· पौने· शात्रेताङीस्यापिसाधुत्वात्
सर्वतइत्येतत्पर्यंतधावनं व्यर्थं दुष्टं च· इतिस्मरणं· उपमेयतावच्छेदकपुरस्कारेणोपमेयेइति· उपमेयतावच्छेदकमात्रप्र
कारकप्रतीतिजनकशब्दबोधविषयेइत्यर्थः तेनातिशयोक्तौ चंद्रादिपदान्मुखत्वादिनामुखोपस्थितिरितिमतेपिनातिव्याप्तिः
कमलतादूप्यस्याविधानादिति· सुंदरत्वादेः कमलत्वादिविशिष्टे विशेषणत्वमेवनोद्देश्यतावच्छेदकत्वमितिभावः ईयांस्तु वि
शेषोयदतिशयोक्तौ उपमेयधर्मस्योद्देश्यतावच्छेदकत्वाभाव एव· रूपकेत्वनियम इति· विषयस्यानिर्दिष्टत्वादिति· निषेध

प्रतियोगिविधयानिर्दिष्टत्वादिदं चिंत्यं·न च निर्दिष्टत्वेपि पुरस्काराभावः तावत्पर्यंतविवक्षाकोधनार्थमेवानिह्नुतइति विशेष
णमितिरप्हारण·निर्दिष्टइति विशेषणालभ्यानंकथनमेवानाहार्यत्वविशेषणं·अतिशयोक्तौ लक्षणामाहात्म्यादुपमानस्य
ज्ञानस्यानाहार्यत्वेनैतावतैव वारणात्·शक्यतावच्छेदकलक्ष्यतावच्छेदकयोभिन्नमितिमतांतरेपि युगपदेवोभयोर्भानेन वाधे
स्यैवानुपस्थितत्वान्नतदुद्देशहार्यत्वं·किंच चंद्रत्वत्रिगुणानत्वस्य लक्ष्यतावच्छेदकस्य चंद्रत्वस्य च विरोधाभावेनन वाधप्रतिसं
धाने·मुखत्वेन मुखं लक्ष्यतइति त्वश्रद्धेयमेव·अपरः शीतांशुरिति ताद्रूप्यरूपके तु वाधस्य स्फुटमुपस्थित्यासासाक्षाच्चं जनप
वाजापमानानां ताद्रूप्यप्रतिपत्तिराहार्यैव·तत्र च चंद्रादिपदं तत्कार्यकारिणि लाक्षणिकं·एवं च वक्त्राभिन्नश्चंद्रकार्यकारीति वोधः·उ
पमानतावच्छेदकावच्छिन्नेनाभेदान्वयएवत्यभेदरूपकं·सादृश्यप्रयोजकवोधाभावाच्चोपमातस्ताद्रूप्यरूपकस्य भेदः·चंद्रकार्य
कारित्वस्याप्यभेदनद्वारोपएव·मुखे चंद्रकार्यसजातीयजनकत्वस्य सत्वेपि तदभावादिति कुवलयानंदस्वरसः·अतिशयोक्तौ
वाहार्यनिश्चयइति कुवलयानंदस्तु नीलोत्पलादिपदाल्लक्षणया नेत्रत्वेन नेत्रोपस्थितिः तत्र च प्राक्तस्योपस्थितस्याभेदे
नान्वयइति मतेन वोध्यः त्वयोक्तपामपन्हुतावतिप्रसंगइति·उपमेयोपमादीनां वैचित्र्यविशेषेणालंकारांतरत्ववदिहाप्यु
पपत्तेः मतांतरेप्यभेदादिकृतचमत्कारे रूपकं·निह्नवादिकृतेपि तस्मिंस्तत्सत्तेनिषयनिभागसंभवाच्चिंत्यमिदं·समुदितसंपात्वे

कारान्तरत्वेनांशेरूपकत्वे इष्टोपपत्तेश्चेतिदिक् । अवयवरूपके विवर्तनादिति । रूपकसंघातस्यावयविन अवयवे कस्मिं-
श्चिद्रूपके इत्यर्थः । परस्परनिरपेक्षत्वाभ्यामिति । सावयवत्वेनेव विषयकं परस्परसापेक्षं चेदोध्यं । विषयमालाकृत इति-
एकस्योपमानस्यनानोपमेयकृतः । सत्यं श्लेषेणामुखाभेदप्रतीताविति । अत्रेदं चिंत्यं । कमलावासेनापराजिताकासार
इत्यादौ यथा श्लेषमूलकाभेदाध्यवसानेनैनसाधारणं धर्ममादापराजितकासारयोरप्यरूपकस्य गांभीर्येण समुद्रोपमि-
त्यादावेवसंभवेनतत्कमलावासकासार इत्यादावपिसंभवात् किमर्थं पंक्तिः । साधारणधर्मत्तानस्य चाभेदारोपप्र-
योजकत्वात् । इदमेव चास्योपपादकत्वमारोपे । पत्तन्मूलीभूतसाधारणधर्मसंपत्तिः । साधारणधर्मसंपत्तिरारोपे सौवेत्यत्र नाकि-
चिन्मात्रेसमर्थ्यपकत्वव्यवहारस्तु माऽस्तु । न वापि श्लिष्टेषु सादृश्यमूलकत्वाभावादावश्यकः । एवं च कारुण्यकुसुमाकाशः
वरवत्स इत्यादौ च स्यमाणान्योन्याश्रयोऽपि न । श्वलाकाशरूपकोपयुक्तकारुण्यकुसुमयोरभेदप्रत्ययस्यच्छाधीनाहार्यस्य
संभवेन तावत्तैवोपपत्तेः । ननु समर्थ्यकारोपे सादृश्यमूलकत्वमावश्यकमित्यनुपदमेवोक्तमितिमम प्रतिभाति एतेन स्या
देतद्दित्यादिसोजन्यचंद्रिकाचंद्र इत्यत्र पर्वः पक्षस्तत्समाधानेपरास्ते । अस्मदुक्तरीत्यापर्वपक्षस्यैवाभावात् । समर्थ्यकोभ
वतीतिसर्वं सुस्थमिति । अन्येतु तुल्यचित्तिवेघनयाचंद्राभेदस्यापिमुखप्रतीतेरार्थं चेद्रूपके । शाब्दं तुव्यस्तस्य । मुखाभेदस्य समास

श्री०
१२
12

शास्त्रप्रवृत्त्युपयोगित्वं गोकारेपि अतात्पर्यविषयत्वान्न तमादाय मुखरूपकव्यवहारः किंचात्र पूर्वपदार्थप्रधानमयूरव्यंसका
दिसमासेन चंद्राभेदस्यैव मुखे भानात् न दोषः अत एव विशेष्यस्य पूर्वनिपातार्थमिदमिति भाष्यकृतः एवं च वाच्यतापि चंद्ररूप
कस्येत्याहुः अपरे तु चंद्रनिष्ठाभेदश्चंद्रप्रतियोगिकाभेदस्वरूपं अत एव तद्रूपकमभेदो य उपमानोपमेययोरित्युक्तं प्रकाशे
पद्मविषयिनिष्ठाभेदप्रत्यायकत्वे तत्र विषयस्य रंजनमित्येन लक्षणार्थः एवं च मुखप्रतियोगिकाभेदावांश्चंद्र इत्येवं बोधेपि न
क्षतिः तस्याभेदेनेति विषयतावच्छेदकावच्छिन्नविषयस्येत्यर्थः न बाधबुद्धिप्रतिबध्यत्वमिति एतन्मते [redacted] ह्येकरूपकल
क्षणा आनिह्नुतविषयकं पुरस्कृतविषयतावच्छेदककं वा आहार्याभेदप्रतीतिफलकोपमानबोधकपदजन्यप्रतीति
विषयीभूतं सादृश्यमिति शाब्दबुद्धेरनुत्पादो योग्यताज्ञानविरहादिति इदं तु चिंत्यं शाब्दबोधो भवत्येव अत एव वह्निना सिं
चतीति वाक्यप्रयोक्तुरद्भुतेन वह्निना कथं सेकं ब्रवीषीत्युपहासः संगच्छते अबोधे हि तदर्थकद्रविडभाषाश्रवणोत्तरं पा
ख्यात्यस्येव मूकतास्यात् न च पदार्थस्मरणमेव न शाब्दबोध इति चेत्तर्हि किमनेन आग्रहेण बाधज्ञानादीनां च तत्तद्बोधप्रा
माण्यज्ञानजननद्वारा प्रवृत्तिप्रतिबंधकत्वं योग्यताज्ञानादीनां च तज्जनकत्वमेवेति पंथा रमणीयः ॥ अपि च तत्तद्धर्म रांम०
वत्त्वबुद्धेरिति चमत्कारिसाधारणधर्मरूपसादृश्यज्ञाने एव फलबलात्तथा शक्तिकल्पनेनानायं दोष इत्याहुः अमन्ता १२

23

मित्रबवोधे सत्यवेति । ननु सदृशत्वेन ज्ञाने । तत्सदृशात्तत्कार्योत्पत्तेरनुभवतिरूढत्वात् । विशेषणसमासेनुरूपकमिति । चित्र
मिदं चंद्रमुखइत्यस्यापत्तेः । पादरणमालंकारोदाहरणेनु विशेषणसमासउचितः प्रसंगेन निरूपितमिति । कुंकुमद्रवलिप्ताङ्गः
काश्यापवसनोपतिं क्रोमलात पशोणमत्रः संध्याकालोनसंशम इति । मनोभवव्याधिमत्वादित्ति मनसिजातमदनसंबंधिवि
शिष्टाधिमत्वं दपिता चामनोभवव्याधिरूपक्षपमंथकत्वंरसे । मनोभवसंबंधिराजयक्ष्मव्याधिमत्वं चंद्रे । चंद्रालोके वुपत्रो
पमानविवेणसर्वथाप्युपरज्यते उपमेयमयीमित्तित्र रूपकमिष्यते । समानधर्मयुक्साध्यारोपात्सोपाधिरूपकं । उत्ति
क्षिप्तिमध्वक्षपक्षच्छेदपुरंदरः साधारणधर्मानिर्दिशोपमानस्यपत्नारोपइत्यर्थः ४ व्यपकृष्टिपितसादृश्यपदंश्यसादृश्य
रूपकं । उक्तसत्यचशाखसोराजते भुजभूरुहः स्यादंगपादिरित्येवंविधमाभासरूपकं । अंगपादिधनुर्वल्लीत्यादिरूपितरूप
कमित्यपिदृश्यतेउपमानप्रतियोगिकाभेदोरूपकं इतिरूपकं ॥ रूपकादस्यभेद इति । वमः नुक्तं । उपमेयप्रतियोगिका
भेदः परिणाम ४ प्रतीपवत् । तत्राभेद उपमेयप्रतियोगित्वतात्पर्यग्राहकं प्रकृतकार्योपयोगः एवं च पत्रोपमान
स्यस्वात्मनैव प्रकृतकार्योपयोगो पत्रवोदासीनतात्तत्ररूपकं । एवं च परिणामो विशेषणसमासापत्ते । रूपकंमयूरव्यं
सकादिसमासामत्रेमुखचंद्रइत्यादौ । एतेन परिणामेमयूरव्यंसकादिसमासइत्यपास्तं । विशेषणसमासेनाप्युत्तरपदा

श्री०
१३
13

र्यप्राधान्यसिद्धेश्चैवमाहुः केचित्तु चंद्रमुखंमनोज्ञदृगित्यादिवारणायोपमानप्रतियोगिकाभेदसंसर्गेणाबोधकानामुपमे
पमेयपदानां मयूरव्यंसकादिसुपाठ आवश्यकः अन्यथाविशेष्यनिष्ठविशेषणाभावे कामचारात्तथाप्रयोगोपि दुर्वारः इत्याहुः
परिणामेपि दृष्टकप्रतियोगिकाभेदवद्रुमित्येवबोध इत्यप्याहुः परिणामे प्रकृतकार्योपयोगिता प्रकृतात्मनैव रसोपयो
गितात्मत्वस्यात्मनाबोध्या चंद्रालोककृतस्तु परिणामोनमोर्यत्र भिन्नभेदं पर्यवस्यति कांतेन दृष्टार हासमोनमेवोत्तरं दद्दा
विति परिणामलक्षणमाहुः अत्रैवशब्दाद्धिलविलाभेदप्रतीतिरितिशाब्दागमकृतः विषयतादात्म्याध्यवसायरूपाति
शयात्मत्वपरिणतिः प्रकृतकार्योपयोगितावच्छेदिकायत्रसपरिणाम इतिसर्वसमासगोपयोति आवं। आववचः
सुधामितिमयूरव्यंसकादित्वात्समासः स्यात्वाकालक इति वत् प्रकृतकार्योपयोगित्वत्वपर्यंतं परिणामशरीरत्वतत्र
तरएवतिरमनुपदस्यासमस्तत्वात् पर्वोक्तस्यवास्यगत्वं पञ्चात्त्रिादीक्षितेन वैयधिकरण्येनपरिणाम इतिः अनु
क्तोपालंभोयंपरिणामप्रकरणेइदंवैयधिकरण्यपरूपकेपि द्रष्टव्यमित्युक्तानारानापकशेखरायेत्युदाहृततैः तत्र
नधाशेखरिणेइत्यशे आर्थरूपकं नवाच्यं उपमानप्रतियोगोकाभेदरयोपन्नेपडमानात् दंगारितोपपादकंस्वशे राम०
खरादीतितुचिंत्यमेव नारायणोनास्तिरेणइत्यस्यतदुपपादकत्वाभावात् किंतुनमस्यता प्रयोजकःशिवनिष्ठोत्कर्षवो १३

धकानिइमानि॰तद्रुपप्रदर्शकत्वाचशेखरस्यनदीतादात्म्यापत्तेरितिपरिणामएवायं॰शेखरस्यनीचजनसाधारणत्वा
त्॰इतएवास्वरसाद्विर्भावः पुष्पकेतोरितिपर्याप्तरमुद्दत्तंदीक्षितैः अथपाक्रमतामित्यादि प्राप्युक्त॰विपरीतमिति॰
अत्रेदंचिंत्यंपलिकंचित्दूपोपापनस्यराजसंघटनानुपपत्त्वाद्विलक्षणावचनतुरंगसादिरूपस्यैवचातुरुपापत्वात्तराज
संघटनोपयोगित्वंतुरंगमादिरूपेणैवोपापनस्यैत्येतदुक्तिरेवविपरीता॰वचोनिषाभेदप्रतीतियोगीत्यादिममनुप्रति
भातिपूर्वपदार्थप्रधानमपरव्यसकादिसमासेनमुखप्रतीतियोगिकाभेदवद्वइत्येवबोधोरूपके॥मीनवतीनयनाभ्या
मित्यत्रमुखेमीनसरसीतादात्म्यरूपंरूपकंमुख्यवाक्यार्थः तत्रचसाधारणधर्मोमीनवत्वादि॰तस्यचमुखेबाधात्नयना
भ्यांमीननत्वमितिमुखेविशेषणंसरस्याचमीनवत्वंप्रसिद्धमेव॰एवंचमुखेमीननत्वसंपादनरूपप्रकृतकार्येउपयोगि
तामीनानानयनात्मतापत्त्यैवेतितद्दंशेपरिणामएवेतिनयनप्रतियोगिकाभेदवन्मीनवतीत्येवबोधइतिदिक्॰रमणी
५३ ममेवविघोरिणोक्तमिति॰अत्रेदंचिंत्यंराजशब्दस्यानेकार्थत्वात्विश्रंभतेश्चलदुक्तार्थप्रागल्भ्योभयपरत्वात्प्रकरणा
देश्चशक्तिसंकोचकस्याभावात्तुल्यतयापार्थद्वयोपस्थितौसर्वदोमाधवरतिवशलेपएवाध्येधपरिणामः कनान्यस्य
व्यज्यमानता॰प्रकृतन्नृसिंहराज्ञोत्कर्षस्यचेद्दृकर्मकाक्रमणेनेतरान्यापाक्रमणेनापिसरूपपादत्वात्॰अस्तुवाआरोपः

न्यथापि न्यपस्यैवारोप्यमाणत्वाभ्रंशः त्वं च दृश्यैव विषयत्वमिति तत्र नियामकाभावः अपि च प्रागन्यपस्यापि विज्ञेयभत्पर्यत्वेन प्र
कृतकार्योपयोगितान्यपत्वेनापिन्यपस्य संभवति॰ अत एव विधाधरेण स्वरूपेण प्रकृतकार्यानुपयोगित्वे परिणाम इत्यु
क्तं॰ ननु तान्यपर्यन्तिषपीभूतप्रकृतकार्यानुपयोगित्वमस्त्येवेति चेत् तन्नस्यैव तान्यपर्यविषयत्वे मानं निभावयति॰ इति परि
णाम॰ कोघवगाहिनी॥ धीरिति॰ तादृशधीर्वृत्ति संशयत्वप्रकारज्ञानविषयासालंकाररूपः संशये विरोधो न भासते कि
त्वविरोधित्वज्ञानाभावविशिष्टनानाकोटिकज्ञानमेव संशय इति मतेनाह यद्वा सादृश्येति॰ तत्र विरोधभानवादिमते अलि
नैत्रं वेति वाक्यात् अलित्ववान् यलित्वविरुद्धनेत्रत्ववान् इति विशिष्टवैशिष्ट्यान्याये नैकत्र त्वविरुद्धाति + द्वयमिति न्यायमे
न वाबोधः अलिशब्दस्य च वाशब्दसमभिव्याहारेव्युत्पत्ति ये चित्र्याद्भ्रमपत्रान्वयः केचित्तु वाशब्दद्वयबलादलित्वनिरूद्धने
त्रत्ववान् मं नेत्र + त्ववानिति वोधमाहुः तद्भानवादे तु अलित्ववानयं नेत्रत्ववानिति॰ समुच्चयेत्वे तन्मते विरोधभानभंगीका
र्यमिति दिक्॰ आज्ञामुमेयोरित्यादावपि॰ तत्र स्थाज्ञा संदेहः ऽविलंघनीयत्वं वनदेवता संदेहे वनस्थितत्वं च दृष्यगुपात्तं॰ समुच्चसत्पा
त्तिपदामिति॰ पादप्रतिविंवानिर्देशान्यूनतात्र॰ परं पारितोप्यपर्यं संभवतीति॰॥ आरोपस्यारोपमात्रोपाधत्वेन परं पारितत्वं॰ ननु सं
शयस्य संशयोपायत्वेन॰ हैत्यादीनां नमस्त्वादि संदेहाविषयत्वादिति वोध्यं॰ ध्वचित्स्मरनिष्ठोपीति॰ यद्यपि विद्वदैन्येत्युदाहृतो

पिपरानिष्ठः तथापि केषामिति सामान्येन निर्देशात्स्वनिष्ठोऽपि वक्तीत्यर्थः उदाहरणांतरम् · ससंदेह इति व्यवहारस्तौ
पचारिको भ्रांतिमानितिवत् · इति ससंदेहः ॥ वर्ण्यमानस्योपमानादस्य वारणमेति · विप्रलंभमहापत्यादिजनकान्यस्मिन्न
न्यावभासत्वमाद इतिज्ञत्वस्मरणमितिमनेनदे · भ्रांतिसमुदायार्थमनुल्लेखेति व्याप्तेश्चेति · उल्लेखवभ्रांतिमतोरत्र संकी
र्णत्वं · भ्रांतत्वमतत्त्वचारित्व · किंच वस्तितेति विदत्येतां लोकाः सर्वे वदंतु ते पूर्णा परिणामासेपत्र पस्येतिमनं भ्रमे जिन्नित्व
दुदाहृतापह्नुतिसंकीर्णोल्लेखे रूपमेपत्तावच्छेदकनिषेधसामानाधिकरण्येपनाशोप्यमाणमुपमानतादात्म्यमपह्नुतित्व
श्लेषस्मरणातिव्याप्तिः एवं तत्र तदलंकारसंकीर्णो तत्र तदलंकारलक्षणस्य साधु वीरेति चिंत्यमेतत् · कीरदष्टइत्यत्र विधेयाविम
र्शादिति · पारणी । नुद्दिश्यविशिष्टस्य कीरकर्तृकदष्टत्वस्य विधेयत्वे को दोष इति चिंत्यं · लाताव्यभमपीतिना प्रस्तरणेपशर
रायमिति संनिहितेनेतिभावः अनाहार्यत्वेन निश्चयविशेषणोत्विति · एवमप्यतिशयोक्तौ कथमतिव्याप्तिर्नारस्तंतस्या
मनाहार्यभेदज्ञानस्यैव सर्वसंमतत्वादिति चिंत्यं · इति भ्रांतिमान् चिरंचकोरा इति · स्वस्वप्रिमाहारलिप्साचनिमित्तं · अत्र
इमौ ग्रहणयोरिति · प्रथमपादद्वितीयपादप्रतिपाद्ययोरित्यर्थः फलानामुल्लेख इति · उदाहरणे एकस्यैव राजोदात
त्वहेतुत्वप्रकारेणोल्लेखः उत्तरत्र चैकस्य पुराणपतमालस्य हरिपदसंगादिहेतुकत्वेनोल्लेखः प्रकारस्य फलत्वहेतुत्वाभ्यां फ

श्री० १५ 15 न्नेत्वादिव्यवहारः समानाधिकरणेनासंबंधिनामिति । आश्रमत्वविषयसमानाधिकरणपदार्थरूपाश्रये संबंधिनस्तेषां मध्य
पस्यकस्यचिदेकत्वप्रयुक्त इत्यर्थः । पमत्वादिनांभ्रांतिरपीति शरणोघनांभ्रांति वर्णनेराजोत्कर्षविरोधीति चिंत्यं किंच ज्ञा
नपर्यंतस्य पदे वैच्छिखस्य कथमत्र सत्वं ज्ञानस्यानिबंधनात्तन्निपतत्वं जनकसामग्र्यभावान्नार्थोपि सः विविक्तविषयस्य च म
त्कितेरिति । जन्यत्वव्यपदेशार्थं भ्रमत्वकत्वानन्वैति । इत्युक्तेरवः रूपकवारणायेति भ्रांत्यादेरप्युपलक्षणं । भ्रमरकुलनम्येति एत
दंशोऽतिशयोक्तिरिति प्रक्रमभेदोत्रकाव्ये । विधेयत्वमनुवाद्यत्वं चेति । उभयोरप्यनुवाद्यत्वं विधेयत्वं चेत्यर्थः । ताद्रूप्यप्रयो
गार्थत्वं विधेयत्वं चेति । अनुवाद्यत्वं चेति वक्तुमुक्तं । उपमेयमसत्यं कृत्वेति । अत्र हि उपमेयपदं पदार्थोपलक्षणमेव रूप
कमिसे तद्विरोधाभ्रांत्य इत्यग्रे स्फुटं निरूपयिष्यते । ताविकं विषमित्याह्नुतिरिति । अत्रेदं चिंत्यं । नेदं मुखं चंद्र इति प्रसिद्धापह्नुत्यु
दाहरणेपि मुखत्वनिषेधस्य चंद्रारोपद्वाप्यसंपादकत्वस्यैव तु शक्यत्वेनानुभवसिद्धत्वेन चापह्नुतिमात्रस्योच्छेदापत्तिरिति ।
यदि तु निषेधपूर्वकारोपे चमत्कारविशेषस्यानुभवसिद्धत्वादलंकारांतरत्वं तर्हि प्रकृतेपि तुल्यं । रत्नाकराद्यनुसारेणेति । अपह्नुतिप
रपह्नुत्यकिंचिदन्यार्थसूचनमिति दंड्यनुसारेणोत्पापि बोध्यं । सर्वमेवेदमहृदयंगमेसहृदयानामिति । अत्रेदं चिंत्यं । दाक्षिणैर्हि राम० १५
दंडोत्तपह्नुतिरपह्नुत्यकिंचिदन्यार्थसूचनं न पंचेषुः स्मरस्तस्य सहस्रं पत्रिणां यतः इत्युपक्रम्य तदनुसारेणैवत्वदालेख्यपादाव

पह्नुतिध्वनिरुदाहृतः शक्तिन किंचिदहृदयंगमं· प्रकाशविरोधोपिन· तत्रोपमेयपदस्य पदार्थोपलक्षणत्वात्· अन्यथा
केसमुनलामोदि अ इत्यत्रस्वपंन प्रपलाप्यगतास्तद्वैरिणोपिनुतः· पराभवसंभाव्यतान्कदराननत्यजेनीत्यपह्नुतिर्व्यंज्यते
इति प्रकाशोऽसंगतःस्यादिति· इत्यपह्नुतिः पत्रोत्प्रेक्षासामग्रीति· साचरमरागीयतद्धर्मसंबंधादिः। अत्रैकाधिकरणपाप
त्रेइति· समुदायापत्रेइत्यर्थः पमुनाजलयोर्मलोत्प्रेक्षेति० किशोरीम क्रिमोत्प्रेक्षोपपादकत्वात्तस्यामलोत्प्रेक्षात्वेवोध्यंश
शिकिशोऽरोमपानुकूलेति· शशिकिशोराभित्राःक्रोशनानुकूलेति पुक्तःपाठः अवतिष्ठतेऽध्यवसानवशादिति अध्य
वसानंचमंचाःक्रोशंतीत्यादिविषयिवाचकेनसमानाधिकरणधर्मस्यकार्यरूपस्येति· वास्तवहर्षाधिकरणचेतनव
त्तितत्कार्यस्यगमनादेःपञ्चत्वक्ष्म्यामवृत्तेरितिभावः घञादि· बुभावग्रहणस्येति· ननुकर्त्तरिकृदित्यतःकर्त्तरिलःकर्मणी
त्यत्रानुवर्त्तनेतत्रानुकूलव्यापारार्थकत्वेकृद्विधायकेपितथैवस्यात् इत्याशंकापनोदायेदं· आधिकारस्त्वत्रस्य कर्त्तरीत्यने
नैवसिद्धेभावनमात्रिव्यर्थस्याद्विषयिणोदितिभावः नन्वेवंलाकारविधायकेपितदर्थकत्वापत्तिरत आह शब्दानुवृत्तिपक्षेति·
ति२ इवार्थस्यनिषेधेयत्वेविषयनिष्ठोद्देश्यतानिरूपितंइवार्थसंभावनाविषयस्यविषयिणोलेपनादेःप्रतीयमानेपरिधेयत्वेन
स्यभंगापत्तेरित्यर्थः विषयस्यविषयिवाचकेनतनमत्तेनिगीर्णत्वादितिभावः निःशदत्वाध्यवसितमिति निःशदत्वेनादा

श्री०
१६
16

त्यनाध्यनसित्तमित्यर्थः इवशब्दान्वितस्योत्प्रेक्ष्यत्वपेति· मोनं हि नेवशब्दान्वितं समासार्थेन्यपदार्थे गुणत्वात्· विषयस्य निगी
र्णत्वेति· एकपदोपस्थाप्यत्वादिति भावः सिद्धः साध्यश्चेति· तदुक्तं सर्वस्वविमर्शिन्योः अध्यवसायो द्विधा· स्वारसिक उत्पाद्य
श्च· तत्र स्वारसिको विषयमाननगम एव यथाम्नातिमदादौ· तत्र हि प्रमात्रन्तरगता स्वारसिक्येव तथाप्रतीतिर्वक्त्रानूद्यते·
स्वारसिकत्वं च कविप्रतिभानिर्वर्तितत्वेन· अन्यथाम्नातिमात्रं स्यात्· द्वितीयस्तु विषयविविक्ततया ज्ञानान एवाविषये
प्रयोजनविशाद्विषमिराणमध्यवस्यतियथोत्प्रेक्षादौ· स पुनर्द्विविधः सिद्धः साध्यश्च· तत्र सिद्धोपत्र विषमस्यानुपात्त
त्ययानिगीर्णत्वादध्यवसायविषयोपमानप्राधान्यं यथातिशयोक्तौ· द्वितीयोपत्रेवाद्युपादानेन संभावनाप्रसंया
त्मत्वाद्विषयस्य निगीर्यमाणत्वादध्यवसायक्रियाया एव प्राधान्यं अत एवात्र विषयानुपादानेपि न सिद्धत्वं· इवाद्युप
दानेन संभावनाया एव प्राधान्यादिति· यथा कथंचिद्धेतुफलयोरन्वयादिति· स्वर्गो ध्वस्त इत्यादाविव नीलरूपवाजात
इत्यादाविव चेति भाव· अत्र तादात्म्येनैवोत्प्रेक्षणामिति हेतूत्प्रेक्षायामपि तथैव· तत्र हेतुः पंचम्यर्थः प्रकृतिप्रत्ययार्थ
योरभेदः संसर्गः तस्य च प्रयोज्यतासंबंधेन कार्येन्वयः संभावना च प्रत्ययार्थ एवान्वेति· एवं च विक्षेपरागाभिन्न संभावना
विषयहेतुप्रयोज्यरक्तत्ववांस्तोऽइति रक्तौ न वा प्रीमद्दुलोमुविविक्षेपरागाध्रुवमिति तदुदाहरणे बोधः विषयीच प्रकृत्यर्थस

रम०
१६

व॰ मूर्विक्षिपरागहेतुककार्याभिन्नत्वेनाध्यवसितस्वभावजन्यपरक्तत्वं चानिमित्तमिति॥ विषयाविक्षपिरागे रूद्देश्यविधेयभावे
न प्रतीतिस्फूर्त्ता वान्नेष्टैव॰ एवं फलोत्प्रेक्षायामपि बोध्यं॰ धर्म्युत्प्रेक्षायां च साधारणधर्मसंबंधो निमित्तं॰ केचित्तु धर्मोत्प्रेक्षा
मेवाहुः॰ ते यांतसहचरितधर्मसंबंधो निमित्तं॰ एवं च प्रकृतेपि हेतुत्वं धर्म्युत्प्रेक्ष्यते॰ स च पंचम्यर्थः तस्य च स्वानिरूपितजन्य
तासंसर्गेणारक्तत्वादावन्वयः प्रकृत्यर्थस्य चाश्रयतासंबंधेन प्रत्ययार्थे॰ उत्प्रेक्ष्यत्वं च पंचम्यर्थस्यैव॰ उत्प्रेक्ष्यतावच्छेदकसं
बंधश्चाश्रयत्वेव॰ प्रकृत्यर्थश्चाविषयः उत्प्रेक्ष्यतावच्छेदकसंबंधेनोत्प्रेक्ष्याधिकरणे स्वनिष्ठजन्यतानिरूपितजनकतासं
बंधेन वर्तमानो निशायोत्पात्तज्जन्यधर्माभिन्नत्वेनाध्यवसितो वर्ण्यवृत्तिर्धर्मो निमित्तं॰ एवं च संभावनाविषयविक्षेपरागवृत्ति हे
तुत्वनिरूपितजन्यताश्रयरक्तत्वं तावित्तिबोधः॰ एवं फलोत्प्रेक्षायामपि बोध्यमित्याहुः॰ प्रतिबंधकनिरासार्थमिति॰ इवशब्दस्य
संभावनार्थकत्वापत्तेरपि बोध्यं॰ स्यात्तं तु सोमास्पदमिति॰ उपमासहितः सोमः यद्वा चंद्रमा मनसो जात इति श्रुतेर्जनकता
संबंधेन सोमास्पदत्वं मनस्युत्प्रेक्ष्यते॰ तेन चेश्वरत्वमपि वर्णस्य व्यंग्यमित्याहुः॥ तदाश्रितानां चेति राजाश्रितानामित्यर्थः
उदयतिवदनव्याजादिति॰ विषयापह्नवश्चात्र शशितादात्म्यसंभावनादाव्यम॰ इत्युत्प्रेक्षा॥ यैस्ववाचकपदेनेति॰ लक्ष्य तच्चर
तावच्छेदकं च मुखत्वमेवेति प्रागेव निरूपितं मलेन च रूपकादभेदः स तत्राह अत्र चेति॰ एतावानेन विशेष इति भावः॰ बाधग्रा

श्री० ११ 17 नस्यचेति एवं चाहार्याभेदबुद्धिरिति। भावः बाधबुद्धिकालिकस्यैवाहार्यत्वात्। प्राचस्तु कमलमनंभसीत्यादौ त्वाह्लाद
कत्वादिकं तत्स्यप्रतावच्छेदकं तेन रूपेण प्रथमतो बोधेन तद्धर्मावच्छिन्ने कमलाभेदप्रत्ययो व्यंजनया नाहार्यः तद्धर्मावच्छि
न्ने कमलाभेदस्य बाधबुद्धेरभावात्। अतएव गौणसाध्यवसानायां सर्वथैवाभेदावगमः इति प्रकाशकृतः रूपके त्वाहार्यैव क्व
पमेव रूपकादस्य विशेष इत्याहुः तन्निन्नेवानुग्राहकत्वमेति। भगवतोनिगरणेन द्वावेध्वन कर्मत्व तद्धरणाकर्त्तृत्वरूपे साधा
रणधर्मौ साधारणत्वसंपादनमेवानुग्राहकत्वं। भेदाभावरूपत्वयेति आस्ये पद्मशशांकत्वेत्यादौ वन्योन्याभावस्य प्रतियो
गितावच्छेदकधर्मरूपता यः सर्वतंत्रसिद्धत्वात्। धर्मस्यान्यत्वांशा प्रसिद्धमिति। धर्मद्वयशून्यत्वं च सामानाधिकरण्यसंबंधा
वच्छिन्नप्रतियोगिताकं नवीनो जलधर इत्यत्र च भगवद्धत्तिलोकोत्तरत्वतत्समानाधिकरणनवसुधाकरणकव्यापिकर्त्तृत्वे
न जलधरत्वेन समानाधिकरणे। सामानाधिकरण्यसंबंधेन तदुभयविशिष्टजलधरत्वं कविकल्पितं। क्वचिद प्रसिद्धमपीति सा
मानाधिकरण्यसंबंधेन तादृशधर्मद्वयविशिष्टतयाऽप्रसिद्धमपीत्यर्थः अपरं चंद्र इत्यादावनन्वयेव। मुखमपरं चंद्र इत्यादौ
कविकल्पितविशिष्टचंद्रेणाहार्याभेदप्रतीतेरूपकं। केचित्तु कविकल्पितत्वादृशचंद्रत्वस्य मुखत्वेन विरोधाभावादनाहार्यै राम०
व विषयितावच्छेदकरप्रकाधारकाधीरत्र रूपकलक्षणे आहार्यत्वं न देयं। अतिशयोक्तिस्तवनाहार्यैव रूपके आहार्यानाहा ११

यांच धीरिति॰ अन्येतु प्रकृतस्य पदान्यत्वमित्यतिशयोक्तिरेषु प्रकृतस्यानिविक्ताकारवस्त्वंतरत्वेनान्यवस्तुत्वेन वाध्य
वसानमित्तितद्दर्थः आस्ति हि प्रकृतस्य मुखस्य चंद्रत्वेनाध्यवसानं आहार्यत्वाभावाच्च न रूपकमित्याहुः कुवलमानंदपदु
क्तेतन्निरस्तमिति॰ अत्रेदं चिंत्यं॰ काव्यप्रकाशादौ रित्यात्तदुक्तेर्निर्वाधत्वात्॥ किंच तत्पाप्यभेदप्रधानातिशयोक्तिरिति प्राची
चीनव्यवहारसंगमनापविषयितावच्छेदकमभेवाभेदइत्यवश्यंवक्तव्यं॰ एवंच तत्पैवाभेदातिशयोक्तिरिति व्यवहारोमयापि
रूपपादः कोपंगलितहरणाइत्यादौ प्रसिद्धविषयितावच्छेदकप्रकारकवोधस्यवाधबुद्धिपराहतत्वात्कोयमित्यनेननिरस्त
त्वाच्चावश्यंचंद्रकार्यकारित्वप्रकारकवोधोंगीकार्यः एषैवचतादूप्यातिशयोक्तिः अत्रापिविषयितावच्छेदकप्रकारकधी के
राहार्यैव॰ तद्धर्मविशिष्टेशाक्यसंवंधग्रहोपित्तथैवतद्धर्मवैशिष्ट्यमपिलक्ष्यस्यारोपितमेवेति॰ रूपकादस्माविशेषइति॰ आ
हार्यत्वानाहार्यत्वकृतोविशेषइत्यर्थः नत्वनन्यत्वादिमिरिति॰ तथाच तेनरूपेणकदापिवोधाभावेनतद्रूपस्याभेदस्यमेदे
नत्वदुक्तेनिवारणमसंगतमितिभावः तेषामननुगतत्वादिति॰ निगीर्यप्रकृतस्यसमेनाध्यवसानंभेदेनाभेदस्यसंवंधेनासं
वंधस्यातिसकलसाधारणस्यैकस्यधर्मस्याभावादतिशयोक्तिलक्षणमननुगतमितिभावः इयमपिगम्योत्प्रेक्षैवेति॰ अत्रेदंचिं
त्यं॰ नन्नेमुखंचंद्रइत्यादौ नन्नंपदाभावेप्रतीयमानस्यरूपकस्यानापत्तेः उत्प्रेक्षामात्रापत्तेश्च॰ तत्कीर्तिभ्रामरणाभ्रांतेत्यत्र

श्री० वद्भूद्दूरगमनमिति भावः इयमपि गम्योत्प्रेक्षैवेति· अत्रेदं चिंत्यं· नूनं मुखं चंद्र इत्यादौ नूनं पदाभावे प्रतीयमानस्य रूपकस्यानुप
१८ त्तेः मनने स्वर्गगमने स्वर्गंगाप्रवेशतादात्म्योत्प्रेक्षोक्तौ स्वर्गंगाप्रवेशकर्तृत्वोत्प्रेक्षावावश्यं स्वीकार्या· अन्यथा मरणस्वा
18 तत्वरूपविशेषणावैयर्थ्यापत्तेः तद्भुत्प्रेक्षितेऽपेक्षासाधकाभावात्· मरणस्यांतत्वरूपहेतूत्प्रेक्षायां तु नकश्चिद्दोषः स्वर्ग
संबंधित्वस्वर्गगमनं· स्वर्गंगाप्रवेशरूपोपात्तो बाधर्मो निमित्तमिति· अग्रिमाभ्यापर्वयोरिति· जन्मशतोपभोग्यसुखदुः
खाभ्यां इयद्दर्शनादर्शनजन्यसुखदुःखयोरित्यर्थः न च पर्वाभ्यामिति· दर्शनादर्शनजन्यसुखदुःखाभ्यामेव जन्मशतोपभोग्य
सुखदुःखयोरित्यर्थः नाशकतावच्छेदकेति पुण्यराशिनाशत्व पापराशिनाशत्वरूपकार्यतावच्छेदकावच्छिन्नकारणता
वच्छेदकं सकलजन्मोपभोग्यसुखत्वादिकमेव· ननु दर्शनजन्यसुखत्वमेव· तत्तत्सुखानां स्वस्वफलोपहितपापनाशकतामाए
वच्छेदकत्वादिति भावः जन्मशतोपभोग्यसुखदुःखे उपमानं महत्वात्· दर्शनादर्शनजन्ये चोपमेये· ध्वनित्वं च प्राचीनरीत्योक्तं· रूपातिश
योक्तिः द्वयोरेवौपम्यं प्रतीयत इति· नत्वत्रतीतावपि नात्र तन्मात्रकृतश्चमत्कारोऽनुभवसिद्धः किंतु तत्सहकृतैकधर्मान्वयकृत एवे
तिदृष्टगतालंकारता· नच गम्योपमैयैव निर्वाहः विद्यमानस्यापि सादृश्यस्यासुंदरसाधारणधर्मकत्वेनासुंदरत्वादिति बोध्यं· गुण रस०
क्रियेत्युपलक्षणं वा धर्मस्येति॥ पद्धजाजात्तिक्रियाद्रव्यातिरिक्तो धर्ममात्रं गुण इति वैयाकरणमतेनेदं· किंच नमनागपि निश्चित १८

इत्यत्र चिन्ताभावकन्दे दृश्यचिन्तानतिरिक्तं तपाण्डुरत्वस्यैव साधारणधर्मत्वमपि वक्तुं शक्यं पुरटं सुवर्णम्। परं वैलक्षण्याक्रान्त
त्वादिति। अत्रेदं चिन्त्यं हिताहितविषयकं तुल्यव्यवहारकर्तृत्वप्रतीतिकृतचमत्कार एव वा। यथोक्तधर्मिगणमेकधर्मान्वय
कृत एव यत्र चमत्कारस्तत्राद्यैतिमे द्वानत्। प्रदीपतेः पराभूतिर्मध्वनिं वमित्यनमोः यथा यथोर्नतादृशैकधर्मान्वयकृतश्चमत्का
रः किंतु राजनिं वयोर्हिताहितविषयकशुभाशुभान्यतरैकज्ञानीयकर्तृत्वव्यवहारकृत एवेति सहृदयहृदयमेवात्र प्रमा
णं। अत एव वज्रगात्रमानो हृदयादमुष्याविलोचनाभ्यामिव वारिधारेत्यत्र न तुल्ययोगिता। चंद्र इव सुंदरं मुखमित्यत्र न दीपकं। न
त्र सादृश्यप्रतीतिकृतचमत्कारस्यैव सत्वात्। न चैवमलंकारान्तरत्वमेवमुक्तं। सत्यमत एवास्वरसात् कुवलयानंदकृता इयं सरस्वती
कंठाभरणोक्तेत्युक्तं। न च तुल्ययोगितायां सादृश्यस्य गम्यतया गम्योपमस्यैव निर्वाहः। तावन्मात्रकृतचमत्काराभावात्। एक
धर्मान्वयकृतस्यापि सत्वात्। प्रतीयमानस्यापि सादृश्यस्यासुंदरसाधारणधर्मकत्वेनासुंदरत्वात् इति। परंपरयाछेदकेति।
स्वकर्मकक्रियामात्रपत्वरूपमेत्यर्थः। वक्ष्यमाणाकारकदीपकेति वसुदातुं यशोधातुमतीव तनिपुणोभवानित्यादौ। चंद्रांशुनिर्म
लवारीति। अत्र द्वितीयचरणेनातिप्रसंगविषयः। तदंशे प्रक्रमभंगश्च काव्ये। रसनारूपेषेति। दधीचिरिव बलिर्वलिरिव कर्णाइ
ति प्रतीतेरित्यर्थः। इति तुल्ययोगिता। अनात्योपम्यस्येति। परंतु प्रकृतमुपमेयं तत्र प्रकृतमुपमानमिति बोध्यं। कर्त्रादि। क

श्री° १९ 19 र्मकरणे आदिपदग्राह्ये । कविसंरम्भगोचर इति । केवलं तादृशानापि कास्वभाववर्णनस्यैव तत्त्वादिति भावः । उपमायामिवस्यादेवद्यो
त्यइति । तेन धर्मस्योपमागम्यमानस्यादिति भावः इति दीपकं । एवं च वस्तुप्रतिवस्तुभावापन्नेति । ताद्विशेषणानां चैव प्रतिबिम्बभावे क्वा
चित्स्यपि इ उपमानोपमेयवृत्तिधर्मो वस्तुप्रतिवस्तुभावापन्न एव । दृष्टान्ते तु साम्यान्न वृत्तिधर्मस्यापि बिम्बप्रतिबिम्बभाव इति दृ
ष्टान्ताद्विशेषः । एकस्यैव धर्मस्य पृथक्शब्दाभ्यामुपादानं वस्तुप्रतिवस्तुभावः । दिवि भाति यथा भावापन्न एव । दृष्टान्ते तु स्त
था त्वं भासि वै भुवि इत्यादौ वाक्यार्थोपमायामतिव्याप्तिवारणायार्थमिति । स्मरणस्य तत्सदृशसंपर्कादिति । यथा वाक्यार्थोप
मायां गगनाधिकरणकभानुकर्तृकशोभाविशिष्टभूम्यधिकरणकत्वत्कर्तृकसत्त्वेति बोधः । वैशिष्ट्यनियामकसंबंधश्च स्वक
र्तृसदृशकर्तृकत्वमेव । संबंधविशेषतात्पर्यग्राहकौ च यथा तथा शब्दौ नैवं प्रकृते स्मरणांतर्भविणोपमानोपमेयभावः । किं
तु तादृशपद्मसदृशं तादृशमाननमित्येव । न च वाक्यार्थोपमायां तादृशशोभाश्रयभानुसदृशः ईदृशशोभाश्रयस्त्वमिति बो
धः । क्रियाविशेषणस्य प्रथमान्तार्थस्योपमानत्वेनान्वयायोगात् । प्रतिवस्तूपमायां तु तादृशसंबंधद्योतकपदाभावात् गम्य
त्वेनौपम्यस्य । यद्वा वाक्यार्थोपमायां तादृशसंबंधोपि यथा तथापदद्योत्यत्वात्प्रकार एव । यत्र वाक्यद्वयगतानां पदार्थानां राम° १९
सर्वेषां परस्परसाम्यं तत्र प्रतिवस्तूपमेति शरदागमकृतः आपद्धृत इत्युदाहरणे आपद्धृतः सत्पुरुषोपवैदार्यवान् चक्रे

वर्त्तित्वादित्यर्थे विशेषरूपेण कालागुरोर्दृष्टान्तता । यथा पर्वतएव वह्निमान् एवं धूमादित्यत्र महानसस्य । तस्मात्का
लागुरुपदृष्टान्तेन तद्वृत्तिसामान्यधर्मावच्छिन्नयोर्व्याप्तिसिद्धौ यत्सामान्ययोर्व्याप्तिस्तद्विशेषयोरपीति न्यायेन पूर्वोक्त
विशेषनियमसिद्धिः । उपमा च । आपद्गतः सत्पुरुषेष्विव दहनेमध्यगकालागुरुसदृशइति । साधारणधर्मश्चात्र विंवप्रतिविं
वभावापन्नो पूर्वोदीर्यलोकोत्तरपरिमलविशेषगणकविस्तारणाविनस्तः प्रतिविंवस्त्वभावापन्नम् । एवं वैयधिकरणोपि
पुरुषः पूज्यत्ववान्संसविशेषवत्वादित्यर्थेतुवीफलवैकल्यमहिमाभावविशिष्टोवीणाद्वन्द्वो न दृष्टान्तः । अतोनेन दृष्टा
न्तेन संगविशेषाभावव्याप्यपूज्यत्वाभाववान्नितित व्यतिरेकव्याप्तिराक्षिप्यते । तत्र च पूर्वोक्तरीत्या एकविशेषेऽपरविशेषस्य
दृष्टान्तत्वाभावात्तद्वृत्तिसामान्यावच्छिन्नव्यतिरेकव्याप्तिराक्षिप्यते सिद्धे च तस्मिन्नत्र द्विपरीत दृष्टान्तेन तादृशसामान्याव
च्छिन्नाञ्च पतिपमसिद्धौ यत्सामान्ययोरितिन्यायात्तादृशविशेषावच्छिन्नकाव्योक्तान्वमनियमसिद्धिरिति । महिमा
भावव्याप्यतुवीफलरहितवीणाद्वंद्वसदृशः संगविशेषाभावव्याप्यपूज्यत्वाभाववान्पुरुषइति चोपमाकारः । तत्वं किम
पीत्यत्रापि मधुव्रतातिरिक्तत्वानाविषयतत्वकमरंदसदृशं साधारणसकलपुरुषत्वानाविषयतत्वककाव्यमित्यु
पमा । यथा कथंचिद्द्वैधर्म्यस्योदाहरणमिति । अत्रेदं चिंत्यं यद्यपि विद्वाने वेत्यस्येवकारवलेनाविद्वान्तजानानां

श्री० २० त्यप्यर्थस्तस्यत्तान्तरवाक्यार्थः सधर्मैव तत्र यापि मृत्तल एव वैध्यापुत्र इत्यादिप्रयोगवारणाय भावान्वमस्यापि विवक्षित
त्वमस्त्येव· नहि वंध्योत्पन्नेनाक्षिप्तस्य प्रसवित्र्येव ज्ञानात्तीत्यस्य वाक्यार्थस्योपमानत्वेन विवक्षणाद्वैधर्म्यवोध्यं· आक्षिप्तव्य
तिरेकसजातीमार्थनिवंधने वैधर्म्यस्येवोपात्तस्वस्वव्यतिरेकयोः स्वव्यतिरेकसजातीयार्थस्यैवनिवंधने तदाक्षिप्तत्तद्व्यति
रेकेणोपात्तस्योपमा यागम्यत्वेपि तत्वोचित्यात्· यदि संतीत्यत्रापि गुणाः स्वयमेव प्रकाशंत इति भावान्वयविधर्मभृत्तक
स्फूरिकामोदःशयथेननत्ता यत इति वाक्यार्थस्तदाक्षिप्तेन स्वयमेव प्रकाशंत इति वाक्यार्थेन भावान्वयवाक्यार्थ एवौ
पम्यंवोध्यं· यद्वा यदि संतीत्यत्रैनकारस्य क्रिमासमभिव्याहृतत्वादन्ययोगव्यवछेद एवार्थः परतोन प्रकाशंत इत्येतदाक्षे
पलभ्यंमेव· तत्रहिद्वितीयाप्यर्थेन स्वतः प्रकाशंत एवेत्येतत्समानजातीपार्थवर्णनं किंतु परतोनेत्येतत्समानजातीयस्यै
व· यत्तु शपथेनन प्रकाशंते किंतु स्वत एवेज्ञानातीत्यर्थप्रतीते वैयधिकरण्योदाहरणत्वेनस्यात्· अस्तु वा एवकारायक + त्य
र्थवर्णनं तत्र स्वत एवेत्यंशोन वाच्यः किंत्वाक्षेपलभ्यः आक्षेपेणाच मार्मिकः को मरंदानामितिभवदुदाहृतेपि मधुव्रतं
विना को जानातिमधुव्रत एव + र्थतोनतत्परत इति प्रस्कृत वाक्यार्थः तथापि व्यतिरेकसजातीयार्थनिवंधनादन्वयसजा राम०
तीयार्थानिवंधनाच्चविद्वानेनेतिव दस्यापि नैधर्म्योदाहरणत्वेतिनस्याक्षिप्तव्यतिरेकसजातीयार्थनिवंधन एव वैधर्म्योदाह २०

रणत्वमितितिरस्कारात्मास्तीति । अनुपात्तधर्मेणोपमेयस्येति । तादृशो पमेयस्यैक धर्मस्य संबंधिभेदेन द्विरुपादानरूप वस्तु
प्रतिवस्तुभावापन्नसाधारणधर्मकत्वाभावात्तस्य प्रतिवस्तूपमोपमोगितेति चिंत्यं । असंष्टुतेनारूपस्येति । एवं वाक्या
र्थघटकाहितप्रत्यूहकर्मणाविति नामार्थविभक्त्यर्थादीनामुत्तरवाक्यार्थघटके प्राणानपहर्तुमित्यत्राभावादसंश्लिष्टता ।
इति प्रतीतसरूपमा ॥ दृष्टांत इति । बिंबप्रतिबिंबभावापन्नसाधारणधर्मकं वाक्यार्थयोरर्थमौपम्यं दृष्टांत इति तत्त्रिष्कर्षः । एकस्यैव
वैभवाद्वाविति । उपमारूपस्यैवेत्यर्थः । इति दृष्टांतः । इहत्वौपम्ययोरितितज्ज्ञानमोरित्यर्थः । अस्यास्तूपमानोपमेययोरिति त्रास्येव परा
शशांकतेति भवदुक्तरूपकोदाहरणे इदमतिव्याप्तमिति चिंत्यं । रूपकस्य गुणीभूतत्वेनेति । कर्तृभेदरूपवाच्यसिद्ध्यंगत्वेनेत्य
र्थः । तयोर्विशेषणविशेष्यरूपकालि शगोत्वयोरित्यर्थः । रूपकादौ तु व्यमाने इति अस्यासामंजस्यापत्तेरित्यनेनान्वयः । तत्र हेतुर्व्य
ग्यत्यादितत्तीयांत । उपमेयोपमेदासिद्धा चेति । निदर्शनायां तथाभावे तु वीजं चिंत्यं । तत्तु तन्मतदषरणेनैवेति । अत्रेदं चिंत्यम
त्वामंतराम्मातिलसंतमिति भवदुदाहृतेपि गम्यरूपकेणोव निर्वाहे निदर्शनाया उच्छेदापत्तिः अन्यथा वाक्यार्थरूपको
च्छेदनत गम्यवाक्यार्थरूपकोच्छेदापत्तिश्च । न च मुखमिव चंद्र इति नाच्योपमा मुखं चंद्र इति गम्योपमैवस्यादिति रूपकोच्छे
द इति वाच्यं तत्राभेदप्रतीतिकृतचमत्कारस्यैन सत्वात । सादृश्यकृतस्य तत्स्याभावाच्च । किंच त्वदुदाहृते कत्रौ रूपकमे

श्री० वास्तु प्रतीयमानोपि क्रियपोर्भेदो विशिष्टरूपके विशेषणाभेदवन्नालंकारान्तरं· तस्माद्गम्यतामात्रेणालंकारान्तरत्वेति रिक्तं वचः
२१· प्राचीनैरलंकारान्तरत्वेन परिगणनाद्गम्यत्वे पंचाव्यत्वे रूपकमित्युच्यते तर्हि प्राचीनसेतुविघटनं व्यर्थमेवेति· बोधमन्नित्यत्र
प्रतीपमानोत्प्रेक्षेति· मुख्यार्थविषया· तत्रापि मते लाक्षणिकार्थपरत्वे [illegible]पमेवेति बोध्यं· इति निदर्शना॰ गुणान्तरेण सा
दृश्यप्रत्ययस्य दुर्वारत्वादिति· अत्रेदं चिंत्यं· कथमिंदुरिवाननं त्वदीयमिति पद्येकलंकत्वेन तद्वाहित्येन वा सादृश्य
न प्रसिद्धमुपपत्तिविषयो वा· यस्य निषेधे कथं शब्देन प्रतिपादिते गुणान्तरत्याद्दृश्यप्रतीतिपथमवतरेत्· किंत्वन्यधर्मप्र
सिद्धसादृश्यैवेदृशाधिक्यप्रस्तत्वप्रतिपादनद्वाराऽभावः प्रतिपाद्यतेऽपकर्षो वा· स चाविशेषात्सर्वधर्मप्रयुक्तस्यैवे
ति गुणान्तरेण सादृश्यप्रत्यय इति रिक्तं वच· कथं तुलयाम: कलयापि पंकजमित्यादौ सर्वथैव सादृश्यनिषेधप्रतीतेश्च· त
स्मादयोरेतादृशान्यूनत्वाधिक्यवर्णनाभावे सादृश्यपर्यवस्यतीत्येतावतैवोपमागर्भत्वव्यवहारः· सोपि कुमुदादाविति रि
च्यते मुखमित्यादौ व्यतिरेकस्यालंकारत्वाभावापत्तेः· किंच व्यतिरेके गुणान्तरेकथिते गुणान्तरसादृश्यस्यापि चमत्कारि· यथा दे
वदत्तेन सदृशो यज्ञदत्तः धनमस्याधिकमित्यादौ· तत्र विद्यादिकृतसादृश्यस्यापि चमत्कारित्वात्· उत्कटविद्यत्वेन देवदत्त राम०
स्य प्रसिद्धत्वादित इति· गुणान्तरकृतनिषेधेति· सादृश्यनिषेधेत्यर्थः· आकूतविशेषेणेति· स्व· उपमेयमविशेषणानि· तदपि २१

चिंत्यां त्याद्यनुकूलत्वं नेति · अत्रेदं चिंत्यं · उपमानादुपमेये वर्ण्यमाने यैलक्षणमेव गुणाधिक्यकृतं व्यतिरेकः तच्च
क्वचिदुपमेयोत्कर्षपर्यवसायि · क्वचित्तदपकर्षपर्यवसायि · क्वचिदनुभयपर्यवसायि · आधिक्यस्य न लक्षणद्वावप्यु
त्कर्षापकर्षपरावेव · तत्रापकर्षपर्यवसायि रक्तमित्यत्रा · अत्रोपमेये सशोकत्वादिगम्यचेतनत्वसहृदयत्वादिभिः शोक
रहितत्व ४ शोकसहितत्वाभ्यां च · गुणाधिक्यप्रतीतावपि शोकस्यस्वरूपेणापकृष्टत्वाच्छिरहिकाक्यत्वाच्च वरमचेतनत्वमेव सम्यक्
न पुनः प्रियावियोगादिजन्यशोकास्पदं चैतन्यादीति प्रतीतिपर्यवसानात् विरहानुगुणाकविनिवद्धतात्पर्यविषयोपकर्षः पर्यव
स्यति · अत एव प्रियावियोगाद्यपि तुल्यमित्यर्थकभावयोः सर्वं तु तुल्यमिति वाक्यं चरितार्थं · एतेनोपमालंकारदूसकरणामेव चम
त्कारीति परास्तं · सशोकत्ववर्णनेपि रक्तत्वादिधर्मैः सादृश्यस्यापि प्रलंभपरिपोषकतया चमत्कारिणः सत्वेन तदपरूवस्यकर्तुम
शक्यत्वात् · अलंकारवियोगोदाहरणं तु मुननत्रितपेपीत्यादि बोध्यमिति · तन्न निपुणानिरीक्षितमापुष्यतेति · अत्रेदं चिंत्यं
श्लेषेपि नात्रामेदाध्यवसायः सर्वदा माधव इतिवत् · किंतु परस्परानेचित मेदीर्घाक्षरादवयवसंस्थानाच्च मेदहंत्यर्थद्वयामित
राम्वयि किं चामेदाध्यवसायेपि नास्यसाधारणं पमेदशब्देनतस्यतिरस्कारेणोपमानिष्पादकत्वाभावेन सकलकलमित्यादिवै
लक्षण्यात् · यदपि तस्योपमानवृत्तित्वेनेत्यादि · तन्न · उपमानत्वं हि सादृश्यप्रतियोगित्वं तच्च प्रतीपालंकारविषयाक्रपराम्या

श्री० स्येव· दीर्घापसरत्वरूपगुणस्याधिकस्य तदन्यास्मिन् उक्तपाणेसत्वाच्च· अकलंकेमुखमिपसद्दशेनसकलंकश्चंद्र इत्या
२२ देर्व्यतिरेकस्यैवमेवानिर्णीतत्वात्· यदप्यनुभवपर्यवसायिनो व्यतिरेकस्योदाहरणमित्यादि तद्दमिन· उत्कर्षापकर्षोभ
यापर्यवसायीत्यपर्यकलुभयपर्यवसायीति तद्वयपाठात्· अनुभयपर्यवसायित्वेन चेदेतद्वोच्यते पराक्रतानुगुणोत्क
र्षापकर्षपर्यवसायित्वाभावेन विद्यमानस्यापि व्यतिरेकस्य नालंकारत्वं किंतु वस्तुतामात्रमिति· अयं कारश्चात्र गम्योप
मेव· हेपरणाक्रुं पाणयो: श्लेषलब्धा क्ततेदीर्घापसराश्च भेदेपि इतरस्य सर्वेनुल्यमेवेति पर्यवसानात्तत्कृतचमत्कारस्यैवसत्वा
च्चत्व दुक्तगम्योपमैवेति· इति व्यतिरेक: अप्रधानशक्तिग्राहकमिति· इदं चिंत्य· अप्रधानस्य ग्रहणप्रत्याख्यानपरमाप्य
विरोधात्· अप्रधानमत्यै: सहगतोरानेत्यत्र न्तीपानापन्तेभ्य· सहे: क्रिलक्षणांचयत्रैकस्यशाब्द: क्रियान्वयो ऽपरस्यसहा
र्थवलादार्थ: सासहोक्तिरिति युक्तमिति· किंतु प्राधान्याप्राधान्याभ्यामिति· प्रधानमुपमेयमप्रधानमुपमानमिति वोद्धव्यं व्य
तिरेकस्यानुत्थानापत्तेरिति· निशाकरसमानत्वेन वर्णितानापेक्षयासाक्षान्निशाकरत्वेन वर्णितेन्भासमानस्य साक्षान्निशाकर
त्ववर्णनप्रयुक्तस्य व्यतिरेकस्यान्यर्थ: प्राचीना एवमहोक्ते: इ यगलंकारतापामिति· एवंचैतदनुभववत्वेनैवमणप्रधान रा०म०
भावकृत विच्छित्तिविशेषमाश्रित्य सर्वस्वकाराद्युक्त: कार्यकारणपौर्वापर्यविपर्ययमन्त्रोपिसहोक्त: प्रकारश्चाश्रयणीय इ २२

तिचित्वे शोणत्वासक्तत्वाभ्यामिति अधरे शोणत्वं मनस्यासक्तत्वं नितंबे धिकभारत्वं मन्मथे उपदेशकर्तृत्वं - इति सहोक्तिः मि
श्रितायथेति · विनाकृतस्य वस्तुनो रमणीयत्वारमणीयत्वाभ्यां मिश्रितत्वप्रयुक्त इति विनोक्तिः रसाकांक्षयालेकापावशतामिति · अ
लंकारस्य अवशता · लंकापावशता च - समासोक्ताव प्रस्तुतवृत्तान्त एव चारुताहेतुरिति प्राचः तेषामयमाशयः अयमैंद्रीत्यादौ श्लि
ष्टविशेषणप्रतीतप्रस्तुताप्रस्तुतवृत्तान्तयोः श्लेषमित्रिकायमैंद्रीधवसायेनाभिन्नयोः प्रस्तुतचंद्रादिवृत्ताश्रिता · तत्र तयोर्वृत्तान्त
योः परस्परं विशेष्यविशेषणभावे कामचारेपि प्रस्तुतवृत्तान्तो विशेष्यः तद्बोधकबोध्याप्रस्तुतस्य अभेदेन तद्विशेषणं एवं
चाप्रस्तुताभिन्नप्रस्तुतस्य चंद्रेणान्वयः तत्र यद्यपि प्रस्तुतस्य स्वासाधारणधर्मेणा चंद्रेन्वययोग्यतास्ति तथाप्यप्रस्तुता
भेदमापन्नस्य नसा स्तीति तद्रूपावच्छिन्नस्य तस्याप्रकृतधर्मिणापारोपः एवं चाप्रस्तुतव्यवहारसमारोपपदेनाप्रस्तुतव्यव
हारतादात्म्यापन्नसमारोप उच्यते · नच तत्तादात्म्यापन्नत्वेपि विशेष्यतायाः प्रस्तुत एव सत्वेनारोपं विनाप्यन्वययोग्य
तेति वाच्यं · दृग्गजेन वीक्षत इत्यादौ विशेष्यस्य स्वरूपेणोत्तरान्वयायोग्यस्येतरतादात्म्यापत्त्यान्वयोग्यत्ववत्स्वतोन्वययोग्य
स्यापीतरतादात्म्यापत्त्यातद्योग्यत्वस्यापि सत्वात् - नच रूपकवत्समासोक्तावपि प्रस्तुतेऽप्रस्तुतरूपसमारोप एव चा
रुताहेतुरस्तु · तद्वाचकपदसममभिव्याहाराभावेन तस्यासंभवात् - नचाक्षिप्तेनापकादिनाक्षिप्तरूपकं भवतु · निरीष्य

श्री॰ विद्युन्नयनैः पयोदइत्यत्र पयोदे दृष्टपुरुषरूपकाक्षेपकनिरीक्षणवदाक्षेपकाभावात् - न च विशेषणसाम्यप्रती
२२ ताप्रकृतवृत्तान्त एवाक्षेपकोस्तु अप्रस्तुतस्य प्रस्तुते विशेषणतयातस्य प्राधान्याभावेनाक्षेपकत्वात् - एतेनाक्षेपासंभ
23 वेपि परनायिकामुखचुंबनस्य श्लेषमर्यादया प्रतीतस्य प्रकृतधर्मिणापारोप्यमाणस्य जारासाधारणधर्मत्वेन प्रकृतध
र्मिणि जारत्वव्यंजकतामुक्येत्यपास्तं - किं चैवं सति वाच्यार्थवोधोत्तरं तद्व्यंग्यप्रतीतिः सापि न केवलव्यवहारमात्रात् अ
पितु तादृशनायकनायिकासंबंधविशिष्टव्यवहारत्तानात् एवं च वाच्यार्थवोधकालिकचमत्कारवीजमात्रमत्रानिरूप्यत्वे
इत्यदोषः अपि च तादृशव्यंग्यस्याधिकचमत्कारकारित्वेन ध्वनिव्यवहारोपयुज्यमानालंकारशरीरघटकता - एवं समा
सोक्तेस्तादृशध्वन्युपस्कारकत्तयाऽधिकचमत्कारकारित्वमलंकारत्वे च - न चैवं समासोक्तौ रूपकध्वनिनैव निर्वाहे दृष्टयमलं
कारत्वं न स्यादिति वाच्यं वाच्यार्थवोधकालिकचमत्कारस्यापह्नोतुमशक्यत्वेनालंकारत्वस्य दुरपह्नवत्वात् - विपरीतनायकत्वव्यं
जनस्य समासोक्त्यंतर्भावे वदतो ध्वनित्वस्य दुर्वारत्वाच्च ० तद्व्यंग्यस्याधिकचमत्कारकारित्वेन प्राधान्यात् न च श्लिष्टशब्दोपस्था
पितयोर्वृत्तान्तयोः परस्परमभेदेनाचयेमानाभावः सहृदयहृदयस्यैव प्रमाणत्वात् अत एवागत्य संप्रति वियोगविसंष्ठुलांगी राम॰
मित्यत्रार्थशक्तिमूलेनानायकनायिकावृत्तान्तो वाच्यरविकमलिनीवृत्तान्ताध्यारोपेणैवास्थितइति प्रदीपकृतः प्राचीनानुभवमप २२

तथापि पदे एकत्र द्वयमिति रीत्या प्रस्तुताप्रस्तुत‍वृत्तान्तयोर्विशेष्ययोरौवाच्यः स्वीक्रियते एवमपि वाच्यार्थबोधकाले प्र
स्तुते धर्मिणि नाप्रस्तुतजारत्वारोपप्रत्याशा। तथाहि। यद्यप्यनयोर्भिन्नपदोपात्तविशेषणयोरिव विशेष्ययोरौव साम्यादन्वयात्सम
प्राधान्यमस्तीति। स्वीक्रियते तथाप्यप्रस्तुतवृत्तान्तान्वयानुरोधात्प्रस्तुतेऽप्रस्तुतरूपसमारोपः प्रस्तुते प्रस्तुतवृत्तान्तारो
पेरौवास्ति। अप्रस्तुतरूपसमारोपेपि प्रस्तुतवृत्तान्तान्वयायोगपत्तापात्सद्वस्थत्वाच्च। नन्वेवं सन्ति विशेषणसाम्याद
प्रस्तुतस्यागम्यत्वे समासोक्तिरिति प्राचीनलक्षणासंगतिः। अप्रस्तुतधर्मिव्यंजनस्यत्वपानपेक्षणादिति चेत्। न। स्वरूपतो
ऽप्रस्तुतवृत्तान्तारोपस्याचमत्कापित्वं। किंत्वप्रस्तुतकामुकादिसंबंधित्वेनावगम्यमानस्यैव तस्यैरोपः। अतः श्लेषादिमहि
म्ना विशेषणपदैः स्वरूपतः समर्पितेन चुंबनादिना ऐंद्रीं चंद्र इत्येतद्गतस्त्रीलिंगपुंलिंगसहकृतेन तत्संबंधिनि कामुकादौ
त्राभिव्यक्ते पुनस्तदीयत्वानुसंधानात् विशेषणसाम्येन वाच्योपस्कारकस्याप्रस्तुतव्यंजनस्यापेक्षणात्। अप्रस्तुतस्ये
त्यस्याप्रस्तुतव्यवहारस्येत्यर्थो वा। एतेन वदनचुंबनस्य पुत्रादिसाधारणत्वात्कथं कामुकाभिव्यंजकत्वं। किंचाहर्मुखं चुं
बतिमानुवंदमित्यत्रापि नायकाद्यभिव्यक्त्यापत्तिरित्यपास्तम्। यत्तु चंद्र ऐंद्री पदगतलिंगाभ्यायाभिव्यक्तनामकयोः स्व
व्यंजकपदोपस्थापिताभ्यामभेदेनैवान्वय उचितः समानपदोपात्तत्वप्रत्यासत्तेरिति तन्न। एवं हि वदनाव्यवहारावच्छेद

श्री॰
२५

कत्वं तयोः स्वीक्रियते न वा । आद्ये एकस्यार्थस्योभयत्रान्वयोऽव्युत्पत्तिग्रस्तः । अंत्ये रसानन्तगुणत्वं । यद्यपि ऐंद्र्यादौ नायि-
कात्वाभाने केवलं व्यञ्जनहारावच्छेदकत्वमात्रस्वीकारे वा ध॰ नायिकात्वानालीढकेवलैन्द्रीमुखचुंबनरूपस्य व्यवहा-
रस्य नायकासंबंधित्वात्तन्म हि दिकू तादात्म्यविना नायिकायाः ए य ङ्मुखं विशेषयितुसामर्थ्यमस्तीति तदपि न । मु-
खशब्दश्लेषसामर्थ्येनैंद्रीमुखमित्यस्यैंद्रांशे मोपेराकेवलमुखचुंबनस्योपस्थितेः । तदेतदुक्तं कुवलयानंदे श्लेषादि-
महिम्ना स्वरूपतः समर्पितेनैव दंमचुंबनादिनेति तस्यैंद्रीशब्दार्थेन दिग्रूपेण वदनरूपमुखपदार्थस्यालयोवक्रांशस्य-
सहृदयैः । नन्वेतादृशाकुस्पष्टिकल्पनापेक्षया विशेषणसामर्थ्यमहिम्ना प्रतीतोऽप्रकृतवाक्यार्थः स्त्रीलिंगपुंल्लिंगाभ्यां
मामभिव्यक्तनायकाद्यभिन्नचंद्रादिघटितप्रकृतवाक्यार्थस्वाव्यवतादात्म्यापन्नतदवयवोऽवतिष्ठत इत्येव कल्पयितु-
मुक्तं । एवं च नायिकाभिन्नेंद्रदिशासंबंधिवदनाभिन्नप्रारंभकर्मकचुंबनरूपसंबंधाश्रयो नायकाभिन्नश्चंद्र इति बोध
इति चेन्न । एवं हि ऐंद्र्यां नायिकाभेदप्रतीतौ मुखचुंबनादौ वदनचुंबनाद्यभेदप्रतीतावपि वदनचुंबने साक्षान्नायिका-
संबंधाप्रतीत्या रसोद्बोधानापत्तेः । न च व्यंजनयापि तत्प्रतीतिरस्त्येवमस्मिन्पदभेदः । तत्संबंधिनि तत्संबंधाभेद इति न्यायेन रसगं॰
वामानायिकीतत्वप्रतीतिस्तत एव चमत्कार इति वाच्यं । तदपेक्षया साक्षाच्चमत्कारोपपादकवाच्यार्थबोधव्युत्पादनस्यै- २५

वौचित्यात्. व्यंजनयाऽप्रकृतार्थबोधः शक्तेः प्रकरणादिनानियंत्रणात्. ततो व्यंजनमाहात्म्यादेव प्रकृतवाक्यार्थतादा
त्म्येनावतिष्ठत इति चेत् व्यांजनिकोऽप्रकृतार्थबोधो नायिकाद्यविशेषितोऽविशेषितो वा. नानियंत्रणात्. ततो व्यंजन
माहात्म्यादेव प्रकृतवाक्यार्थतादात्म्येनावतिष्ठत इति चेत् व्यांजनिकोऽप्रकृतार्थबोधो नायिकाद्यविशेषितोऽविशेषि
वा. नाद्यः रसाननुगुणत्वात्. अन्त्योऽस्वपदोपस्थाप्यलिंगाभ्यां नायिकाधर्मद्वयबोधव्यर्थोऽसंभवी च. नायिकाविशेषणा
कव्यवहारबोधनेन कृतार्थत्वात्. अपि च तत्पासत्तिजारकर्तृकसानुरागपरनायिकामुखचुंबनाभिन्नप्राचीप्रारंभसंयो
गाश्रयो जारोऽभिन्नश्चंद्र इति बोधकदर्शनमेव स्यात् तस्माद्व्यंजनयाशत्यावोपस्थितप्रस्तुतवृत्तांतेन व्यंजनयोपस्थिते
नायकादिसंबंधित्वेनागृहीतेनाभेदमापन्नप्रस्तुतवृत्तांतारोपः प्रकृतविशेष्ये. न च मतेश्लेषस्थलेऽप्रकृतोपस्थितेः श
क्त्यैव त्वेनतन्मते शक्त्यैवाप्रकृतार्थोपस्थितिः प्राचां तु व्यंजनयेत्येतावान्विशेषः एवं वाच्यार्थबोधोत्तरं मदिचंद्रादौना
पकत्वादिप्रतीतिरपि सप्रहृदयानुभवसाक्षिकी नद्दाक्षिप्तुमुपपादितमेव प्राक्. प्रस्तुतप्राचीवृत्तांते आरोप्यमाणप्र
तांवरितनायिकाविशेषवृत्तांतसमर्पणापत्तस्यावश्यकत्वाच्च. एतेन सानुराग. परनायिकामुखचुंबनाभिन्नप्राची
प्रारंभसंयोगाश्रयश्चंद्र इत्येव बोधः समासोक्तिर्गुणीभूतव्यंग्येति व्यवहारस्तु प्रकृतव्यवहारेऽप्रकृतव्यवहाराभेद

श्री० २५

स्य व्यञ्जनया प्रतीतेर्निर्वाध एवेति दितं पिधर्मान्तर पुरस्कारेणेति · कार्यातिरिक्तधर्मपुरस्कारेणेत्यर्थः कार्यातिरिक्तधर्मप्रतिपाद
कविशेषणसाम्येन वाऽप्रकृतार्थोपस्थापनं कार्यप्रतिपादकतत्साम्येन वेति द्वैविध्यमितिभावः श्लेषेति व्याहृपापत्तेरिति · तत्र विशे
ष्यश्लिष्टत्वे विशेषणसाम्यस्याक्षतेरिति भावः न च श्लेषेति · तत्र विशेष्यस्यापि श्लिष्टत्वादिति भावः समासोक्तिवचनमहद्येमिति ·
पत्र विशेषणसाम्यात्प्रतीता प्रकृतव्यवहारतादात्म्यापन्नप्रकृतव्यवहारप्रतीतिः सा समासोक्तिरिति सर्वस्वग्रन्थसिद्धान्तास्त्रकृ
तेऽप्रकृततया प्रतीतावपि क्रियारूपस्य व्यवहारस्य कस्यचिदप्रतीतेरपि नात्र समासोक्तिरिति क्षेपः · एतेन पदपीत्याद्यपि परास्तः
सर्वस्वग्रन्थ इति दिक् · एवं दत्तानंदासमस्तानामिति · अत्रापि व्यवहारस्य कस्यचिन्निपंधनाभावात्कथं समासोक्तिरिति चिन्त्यं · एतादृ
शस्थले व्यंग्यरूपकमुपमा वेति तु युक्तं · न ह्यत्र स्तोतो हृस्वादि विपर्यास इति · न प्रतीयत इत्यत्र शपथातिरिक्तं प्रमाणमन्वि
ष्यताम् · यत्तु पुरापत्रस्तोत इति काव्येऽप्रस्तुतप्रशंसेति · तत्र प्रशंसनमत्र किमुत्कर्षाधानं प्रतीतिमात्रं वा · नाद्यः प्रतीयमा
नार्थानधारोपविषमेषु तत्र प्रस्तुतप्रशंसोदाहरणेष्वव्याप्तिः न हि तात्र स्येनस्थितोप्यर्थ उत्कर्षक इति युक्तं · नान्त्यः प्रकृ
तेऽभावात् · न ह्यत्राप्रस्तुतेन प्रस्तुतस्य प्रतीतिः वाच्यत्वात् · न चान्यतरत्वेनोभयोः संग्रहः समासोक्तेरेवान्यतरत्वघटित रामः०
लक्षणकरणे बाधकाभावात् · अतिशयोत्पादोत्कृष्टत्वाच्चैवं सर्वस्वकारादिविरोधोद्भावनं तु तच्छिष्यकत्वाद संगतमेव · ई २५

दृशाप्रस्कृतप्रशंसामात्रापि तैरनंगीकारेणानवापितद्विरोधस्य सत्त्वाच्चेति दिक्. एकार्थीभाववोधकतारूपमिति. एका
र्थीभावापन्नार्थवोधकतारूपमित्यर्थः इति समासोक्तिः कुवलयानंद दूषणावसरे विच्छित्तिविशेषो नास्तीति तेन सुवच
त्वमिति. अत्रैदं चिंत्यं. दोषाभावमध्येऽनमेनभाववत्ताएकविशेषरो चमत्कारविशेषस्यानंगीकारात्तत्वदुदाहर
णासंगतिः यद्यनुभवबलात्तद्दोषाभावकृतचमत्कारादप्यधिकचमत्कारोऽस्ति वाचनंगीकारस्य प्रयोजकस्युच्यते तो
र्हि संमप्रकृतेपि. किं चापि तु पोषायेति वदतामवतापि यमकादिषु विशेषस्य चमत्कारितामुपेत्य न चमत्कारातिशय
जनकतारूपामाएव पुष्टेः काव्ये स्वीकारात्. यदि तु विवक्षितार्थावबोधएव पोषः विवक्षितार्थबाधप्रयोजकानुपादाने
त्वं च पुष्टत्वं तथाप्यापत्काले क्रियमाणां मंत्रिकाशौचादियथा न दोषाय नापि लोकनिंदायै क्रियमाणां चाधिकस्कृतये
अधिकफलाय च भवति तथा यमकादिषु पुष्टत्वमक्रियमाणां न दोषाय क्रियमाणां त्वाधिकचमत्कारायेति वक्तुं शक्यं. न च
कवेस्कृतये भवतु न चमत्कारायेति वाच्यं. नित्ये फलस्यापि स्वीकारेणानदिनशयस्य ते न जननवदुपपत्तेः इदं नु स्फुटं च
मत्कारएव. अपि तावरायेत्यत्र तपुष्टत्वमक्रियमाणां दोषामक्रियमाणानु विवक्षितार्थाबाधरूपपोषायैवनाधिकचमत्कारायः
यथानापदि अक्रियमाणामाणांमच्छौचादिर्दोषाय. क्रियमाणां तु नाधिकफलायेत्यतो यमकपर्यन्तानुधावनं. वस्तुतः संध्याद्यकर

श्री०
२६
26

रास्यदोषत्वेपितदभावोनदोषाभावमात्रंअपितुफलतयापिएवंपमकाष्ठातिरिक्तेपिसाभिप्रायैकविशेषणोपादानेदोषत्वाभा
वश्चमत्कारश्चेतिअलंकारत्वेकिंचपर्यायान्तरेदोषाभावस्यापाभावेकल्पेपिहिद्वौसंगतत्वकरत्वफलातिशयायैवएवंदोषाभावस्यावि
शेषणानुपादानेपिसंभवेनसाभिप्रायैकविशेषणनिबंधनोपिचमत्कारोदुरपह्नवइतितदेतदपिचएकपदार्थहेतुकमित्यादिना
ग्रंथेनकुवलयानंदेस्फुटमितिदिक्·इतिपरिकरः॥ अत्राद्येभेदइति·आद्येप्रकृतमात्राश्रिते·द्वितीयेऽप्रकृतमात्राश्रिते·तृतीयेउ
भयाश्रिते·अत्रनिरोष्ठ्यस्यश्लिष्टत्वेपिश्लेषालंकारांगीकारेशब्दशक्तिमूलध्वन्युच्छेदापत्तिःकरकलितचक्रेत्यादि·करोहस्तःकिर
णाश्चचक्रंसुदर्शनंकालचक्रंच·तमोराहुरंधकारश्च·अर्जुनस्यगुरुहरित्यत्रगुरुपदंश्लिष्टपर्यायपदिवृत्तिसहंच·शिक्षकादिपदो
पादानस्यापिसंभवात्·हरिर्विष्णुःसूर्यश्च·करोहस्तःकिरणाश्च·अधिकंअतिशयेन·केइत्यधिकंअव्ययीभावः·जलेइत्यर्थश्च
सरगादितिपंचम्यंतमनुलरागेइत्यत्राप्यन्वेति·अखंडितएवश्लेषइति·शब्दशक्तिमूलध्वनिनानखंडितइत्यर्थः·अमरार्चितइति
अनुपमधनार्चितइत्यर्थः·वाध्यप्रायएवेत्याहुरिति·सर्वदोमाधवःपायात्सयोगंगामदीधरदित्यादावलंकारान्तरसंभावनारहि
तसावकाशस्यश्लेषस्यालंकारान्तरेणास्वविषयेवाध्यत्वमेवेत्यर्थः·तत्रकिमुच्यतेऽप्रकृतार्थस्यशक्त्याप्रतिपादनमिति·अत्रे रां०
दंचिंत्यं·कुवलयानंदेस्फटितीत्युक्त्याप्राथमिकवोधत्वमेवप्रतिवध्यतावच्छेदकमितिवोधितं·अन्योन्यसंनिधानवलादित्यने २६

नचेदं बोधितं· पत्रकृतार्थेतिपामकद्वपसत्वात्सयमसुपस्थितिः ९ द्वितीयस्यशब्दांतरसंनिधिमात्रसत्वात्पद्मादिति· सुर
भिमासमुक्तेइत्यादेः पुत्रादिप्रयुक्तात्राश्लीलबोधः शालकादिप्रमुक्तादेवचनदोषइतिव्यवस्थापिवक्तृतात्पर्याग्रहतऊहाभ्या
मुपपादा· पद्मावक्तृबोद्धव्यादिवैशिष्ट्यस्यफलवलेननियंत्रितशक्त्युद्भासोपिहेतुत्वकल्पनान्नदोषः एतान्विशेषः पत्रवक्तृवै
शिष्ट्यादिज्ञानेविलंबेनप्रकरणज्ञानेचशीघ्रंतत्रवक्तृवैशिष्ट्यादीनांनियंत्रितशक्त्युद्भासकत्वंपत्रतुयुगपदेवोभयंतत्रनियंत्र
णाप्रतिबंधकत्वेनोत्तेजकत्वेनवत्तेषां· व्यंजनावादिनापित्तेषांव्यंग्यप्रतिभाहेतुत्वमनन्यगतिकत्वंमेवतद्वरंव्यंजनामनंगीकृत्यते
षांशक्त्युद्भासादिहेतुत्वकल्पनमेव· एवंयोगरूढपदानांयोगार्थमात्रघटितार्थांतरबोधकत्वेप्यत्रतेषांरूढिप्रतिबंधकता
पिस्वीकार्याउत्तेजकतावास्वीकार्याः किंचशब्दशक्तिमूलध्वनिस्थलेसंबंधविशेषरूपव्यंजनापाः बोधजनकत्वकल्पनापेक्ष
याल्लक्षणशक्तेस्तत्वकल्पनमेवोचितम्· एवंचाश्लिष्टसाधारणविशेषणानांसमासोक्तावेवगुणीभूतव्यंग्यत्वंश्लिष्टविशेषणा
यामप्यारोपांशमादायवाच्यत्वमितिदीक्षिताशयइति· वस्तुतस्तुद्वितीयार्थस्यव्यंग्यत्वेपिनतमादायध्वनित्वमुचितंउपमा
नादिविधयातस्यापिप्रकृतोपस्कारकत्वेनगुणत्वात्· अन्यथासमासोक्तावपिगुणीभूतव्यंग्यत्वोक्तिरसंगतास्यादित्यलंकार
मादायैवध्वनित्वमुचितमितिदिक्· इतिश्लेषः॥ तादात्म्यविशेष्यांशेविशेषणांशेचेति· संबोधनानुपपत्त्याविशेष्यांशेरूपाम

श्री० २७ 27 त्वाद्विशेषणालाघुपपत्तेर्विशेषणांशे इति बोध्यं· कुवलयानंदाद्युक्तमुपेक्षणीयमिति· अत्रेदं चिंत्यं· अप्रस्तुतशब्देन मुख्यतात्पर्य
विषयीभूतार्थातिरिक्तोऽर्थ उच्यते इत्यत्र मुख्यत्वं नाम यदि प्रस्तुतत्वं तदुभयोरपि तुल्यं· अथोद्देश्यत्वं· एवमपि प्राचामप्रस्तुतस्तुतेनेति
पदवैयर्थ्यापत्तिः एतावता विशेषणालंकारांतरत्वानंगीकारे साधारणविशेषणमहिम्नाऽप्रकृतस्य स्फूर्त्तौ समासोक्तिरसाधारणवि
शेषणमहिम्ना तत्स्फूर्त्तौ व्यंग्यरूपकमिति त्वदुक्तविषयविभागस्याप्युच्छेदापत्तिः दीपकतुल्ययोगितयोर्दृष्टांतप्रतिवस्तूपमयोर्भेदा
नापत्तेश्च· यत्तु द्वयोः प्रस्तुतत्वे तु ध्वनित्वमिति तत्र मलिनेऽपि रागपूर्णामित्यादौ प्रतीयमानार्थारोपमंतरेणाभ्रमरसंबोधनस्य
तद्वृत्तिश्यामत्वादौ दोषत्वायादेर्वाच्यस्यानुपपद्यमानत्तपाव्यंग्येनैव तदुपपत्तेश्च गुणीभूतव्यंग्यताया एवौचित्यादिति· प्रस्तुता
कुरंगक्षणं तु मुख्यतात्पर्यविषयीभूतप्रस्तुतेतरस्यातादृशेन प्रस्तुतत्वं प्राप्तिनेत्ताध्वननमिति बोध्यं॥ किंसादृश्यमस्ताप्रस्तुतप्र
शंसयेति द्रूति· अत्राप्यसमाधिः वाक्ये शक्त्यभावेन लक्षणा वक्तुमशक्या· किंच लक्षणायां गंगायां घोष इत्यादेरिव वाच्यभेद
प्रतीत्यापत्तिः सा चानिष्टा० तात्पर्येणैव प्रस्तुतार्थप्रतीतेः सहृदयानुभवसिद्धत्वात्तत्तीयलक्षणाहेतोरभावाच्चेति दिक्· एक
धर्मालीढत्वमंतरेणोक्तालंकारत्वे इति· अत्रेदं चिंत्यं· अतिशयोक्त्यादिवत् प्रकृते सादृश्यान्यतमप्रकारनिवेशावच्छान्यतरहेतुकाप्र राम०
स्तुतवृत्तांतारोपत्वरूपैकधर्मालीढत्वसंभवेन समासोक्तेरेवात्रांगीकारे बाधकाभावः· किंचाप्रस्तुतेन प्रस्तुतं प्रशस्यत इत्यस्य को २७

र्थः॰ पघुत्कर्षाधानं तर्हि प्रतीयमानार्थानध्यारोपनिषये सुदिगन्ते अरू पंतत इत्याद्युदाहरणे पुनरव्याप्तिः नहि तत्रास्येन
स्थितो प्यर्थो वाच्यो लंकर्षक इति युक्तं॰ सहृदयसंमतं वा॰ यदि प्रतीतिमात्रं तर्हि न प्रकृतं॰ न ह्यत्राप्रस्तुतेन प्रस्तुतस्य प्रती
तिः अप्रस्तुतेन प्रस्तुतार्थप्रतीतिमात्रकृत एव चमत्कार इति मन्तव्ये ऽलंकारतास्वरूपपादनेति॰ इत्यप्रस्तुतप्रशंसा॰ विवक्षितना
र्थस्य भंग्यन्तरेणोक्तिः केनचिद्रूपेण व्यंजनपालम्भस्यार्थस्य ततोपि चारुतररूपेण यदभिधायाप्रतीपादनं तत्पर्यायोक्तमि
त्यर्थः प्रकारान्तरेणाभिधानप्रसंगनमेवेति अत्राहुः औपाधिकभेदेन घटाकाशादिवद्भेदप्रतीतिवत्तत्र धर्मरूपोपाधिभेदेन ध
र्मिणोपि भेदः। व्यंग्यस्याभिधाविषयत्वमस्त्येव॰ यद्वा व्यंग्यतावच्छेदकापेक्षया वाच्यतावच्छेदकं पत्र चारुतरमिति लक्षणतात्प
र्यं॰ पर्यायपर्यायाविवेकेन तथैव तात्पर्यान्नयनादिति॰ अतिरिक्तप्रकारेणोक्तिः अस्य व्याख्याने व्यंग्येनेति॰ न च व्यंशंप पत्र तेने
ति॰ व्यंग्यतावच्छेदकातिरिक्तधर्मपुरस्कारेण वाच्यमित्यर्थः प्रकृते च पुंडरीकाक्षपदस्य भगवत्तियोगरूढत्वेन तस्य न व्यंग्यत्वमि
तिभावः व्यंग्यस्यैव ग्रहीतुमुचितत्वादिति सर्वस्वकृदाशयवर्णनावसरोक्तानुपपत्तिपरिहारायेत्यर्थः व्यंग्येन स्तुपलक्षितमु
क्तिः अन्यत्र हि वाच्यकेवलमेव प्रतीयते तेनपेक्ष्य पेदप्रकारान्तरं यन्निपत व्यंग्यवैशिष्ट्यमिति॰ व्यंग्यविशेषग्रहणेन तैरवेति
विशेषश्चवक्तृवैशिष्ट्यादिसहकारिकारणानपेक्षत्वं॰ किं च तत्र व्यंग्यापेक्षया वाच्ये चारुतरत्वाभावस्य सहृदयसंम

श्री० २८ 28

त्वेनाक्षतेः व्यंग्यमेव हि नत्र वाच्यां चारु॰ काव्यमार्गेऽभिगण्यत इति॰ राजाज्ञातमात्रमेतत्॰ मदेनैरावणरामुखे इत्यादि प्रकाशोदाहर
णोक्तादृशव्यंग्यस्यैव सत्त्वाच्च॰ पत्यस्यासुंदरत्वमिति॰ तन्न इष्टापत्तेः व्यंग्यसौंदर्यास्याविवक्षितत्वात्॰ व्यंग्यापेक्षया वाच्यस्यैव
पत्र चारुतरत्वमिति स्पष्टमेव तदुक्तेः अत एवात्रालंकारे व्यंग्यवाच्यगरमिति ध्वनिकृतः तादृशविशेषणं हि व्यंग्यमादायैवो
पपद्यत इति हि तदाशयः॰ यत्तु नमो राहुशिरः छेदकारिणो दुःखहारिणे इत्यत्रापि भगवद्वासुदेवत्वव्यंग्यप्रमुक्तं पर्यायोक्तं स्या
दिति तदपि न॰ व्यंग्यापेक्षया चमत्कारित्वे इष्टापत्तेः अतत्वेनु चारुतरत्वे तत्पिशुनत्वावर्तनीयं॰ राहुस्त्रीकुचनैष्फल्यकारिणो रा६
हरये नमः इत्यत्र राहुशिरश्छेदरूपकारणमात्रावगमने प्रस्तुतांकुरः राहुशिरश्छेदकारित्वेन भगवतो वगमेन पर्यायोक्तम
पि॰ यत्तु नात्र प्रस्तुतांकुर इत्यादि तन्न राजाज्ञातमात्रत्वात् किं च मुख्यतात्पर्यविषयीभूतार्थेन वाच्येन व्यंग्येन न वाच्यं व्यंक्तं वा प्र
स्तुतं यत्र सादृश्याद्यन्यतमप्रकारेण प्रशस्यते सोऽप्रस्तुतप्रशंसेति अप्रस्तुतप्रशंसालक्षणस्य भवतानुपदोक्तस्य राहुशि
रश्छेदकारित्वरूपव्यंग्यांशे सत्त्वेनाप्रस्तुतप्रशंसयैव निर्वाहे किं पर्यायोक्तेनेति नियोगेऽन्तरं विभाव्यतां॰ न चात्र द्वयोर
पि मुख्यतात्पर्यविषयत्वेति वाच्यं एवं तर्हि आपदि दिवरमित्यत्रापि पदार्थद्वयोर्मुख्यतात्पर्यविषयत्वात् तदाकालंकार इत्यत्रोत्त रा०म०
रं विभाव्यतां अस्मन्मते तु प्रस्तुतांकुर एव भवतापि तत्स्वीकारे प्रकृते तेनैव गतार्थतास्पष्टैव॰ न चास्मिन्नलंकारे व्यंग्यवाच्य २८

परत्र प्रस्तुतप्रशंसायां तु वाच्यव्यंग्यपरमन्तोनसा · अत एवायमलंकारो वाच्यसिध्यंगगुणीभूतव्यंग्यप्रभेदे ध्वनिकारानुयायि
नः इतिकस्त्वमोइत्यादावप्रस्तुतप्रशंसायां व्यंग्यस्य वाच्यांगत्वेन तस्याभेदकत्वात् · प्राचीनग्रंथविरोधस्तु तन्मतदूषणप्रवृत्त
स्यामृष्यमाणमेव · एवं च सर्वस्वलोचनकृतोः क्लेशो व्यर्थो दुष्टश्चात्यविसम्यमेव · कश्चित्तु पक्षद्वयस्य बुद्धिस्थत्वे अंशस्येतावच्छेद
कमिति तन्मतमेवमुदाहरणानि तद्दूषणं सर्वज्ञानां शक्तिरिति निवेघत्तो हन्तेत्यादीत्याह · अयं चालंकारः क्वचित्कारणेनात्या
दिकार्यादीनां त्वारोपेण चमत्कारित्वेति रश्चेष्टव्यं तत्र यथा क्षिप्रस्य इति कुवलयानंदे ध्वनितमिति दिक् · पर्यायोक्तसमासः प्र
कारान्तरेणेति · वस्तुमाहात्म्याद्धात्तत्र कपदानां लक्षणया वाक्षेपाद्वेत्यर्थः · गोवानेवान्यथात्वेन पर्यवस्यतीति · तत्र च
लक्षणैव · एवं च सत्यतेल्लक्ष्यत्वात्तमादाय न ध्वनित्वं · लक्षणाप्रयोजनीभूतस्य त्वंशस्य यादि व्यंग्यमादाय ध्वनित्वे इष्टा
पत्तिरेव · एवं चोपकृतेत्यादावप्ययमेवालंकार इत्याहुः · अत्रार्थान्तरस्यासंचोदितेति · समासोक्तिरप्यत्रेति बोध्यं · व्यंग्यभेदे
धितिगृह्णातीति · अत्रेदं चिन्त्यं व्यंग्यभेदेष्वप्यप्रस्तुतप्रशंसापर्यायोक्त्याद्यलंकारकारवदत्रापि अलंकारत्वे बाधकाभा
वात् · न चाप्रस्तुतप्रशंसे वास्तां विनिगमकाभावान्न हि लक्ष्ये एव व्याजस्तुतिर्न व्यंग्यस्य इत्यत्र शपथातिरिक्तं प्रमाणमस्ति ·
गुणीभूतव्यंग्यत्वाच्च न ध्वनित्वं प्राचीनग्रंथविरोधस्तु किंचित्कर इत्यसकृदावेदितम् · किमुक्तं द्रविडपुंगवेनेति इति · अतिचि

रकात्तं कृतेपासेवया दुर्विनस्य नन्तोऽत्रा प्रधनस्वामिक्षोराजसेवांत्यक्तुमिच्छति इदृशवाक्येवक्तृवैशिष्ट्यादिसहकारेणाया
त प्रतीपमानस्तुतेर्निन्दापर्यवसायित्वप्राविघुष्टं गुरुप्रातिमत्वमस्त्येवेति सम्यगेवोक्तं द्राविडशिरोमणिना· पर्वोक्तरीत्या
स्वस्वामिक्षाटनोत्थापी चकारेण चत्तत्वस्यानुभवसिद्धत्वाद्ध हन्मन्मते· साधु इत्युदाहरणेपि द्वृत्याद्युच्चारितत्वादिवैशिष्ट्य
प्रमाणान्तरेणाप्रागेवजाननंतो वाच्यार्थबाधत्तानंस्पष्टमेव· कस्त्वं वानरेत्यत्रापि अतिशयितवीरत्वेन प्रसिद्धहन्मन्मतेनिंदा
स्वात्मन्यपर्यवस्यतीतरस्तुतिमादायैवपर्यवस्यतीति इतरस्तुतेर्बलादाक्षिप्तत्वान्नध्वनित्वम्· इतिदिक् इति व्याजस्तुतिः उ
पमेयस्योपमानसंबंधीति· अमुमाक्षेपं प्रतीपं केचिदाहुः सोपिद्विविध इति· वक्ष्यमाणविषयोपीत्यर्थः वेदुष्यं। यांडित्य·
निर्युक्तिकं वदन्नलंकारसर्वस्वकारः परास्त इति· त्वद्गुणवक्तानास्तीतिनिषेधस्य गुणापरिमितत्वव्यंग्यसहितस्याक्षेपरूपस्य
व्यंग्यस्य सत्वादितिभावः अलंकारसर्वस्वकारस्तु निषेधाभासमाक्षेपः नाहं दूतीतनोस्तस्यास्तापः कालानलोपम इत्युदा
हरणमितिनस्यापंभावः यो निषेधो वाधितः सन्नर्थांतरपर्यवसितो विशेषाक्षेपकेनकस्मिंश्चिद्विशेषे आक्षेप्तव्ये सा
हायकं करोतीस आक्षेप इत्यर्थः नाहं दूतीत्यस्य दूत्यानुक्तौ वाधितत्वात् दूतीपदेन मिथ्यावादित्वविशिष्टालक्ष्यतेतन्निषे
धश्चासत्यवादित्वे पर्यवस्यति· एवं च तन्द्वोध्यसत्यवादित्वसहकृतेन तनोस्तापइतिवाक्यं इदानीमेवागत्याङ्गीवनीयेतिविशे 

षमाक्षिपति · अन्यथा संघटनमात्रप्रयोजनकत्वावगमस्यैव तत्र स्यादिति · तत्कालोचितकैतवचनत्वेनैव वासंभावना
स्यादिति · यत्तु तु सत्यत्वादित्वरूपविशेषमादायैवाक्षेपत्वमिति तन्न तस्यापि चमत्कारित्वात् · ततो सत्यपद इत्यादिनोक्तविशे
षमाक्षिपति अन्यथा संघटनमात्रप्रयोजनकत्वावगमस्यैव तत्र स्यादिनोक्तविशेषव्यंजने व्यंजनीमेसहकारित्वं तु तस्याक्षि
अनुभवसिद्धं · तं विना तेनापि तस्यानाक्षेपात् · एतेन नरेंद्रमौले इत्यादि कुवलयानंदोक्तमपि व्याख्यातं · एतेन यत्तु नरेंद्रमौले
इत्यादिना तु विशेषांतरमित्यंतग्रंथः क्लिष्ट इत्याहुः : इत्याक्षेपः ॥ एकाधिकरणसंबद्धत्वेन प्रतिपादितयोरिति · शांतिर्इश
निष्ठेत्यादिवारणायेदमिति कश्चित् · नापि चात्यंतिकी निवृत्तिरित्याहुरिति · वयं तु क्रमः सुप्तोपि प्रबुद्ध इत्यादौ समाना
धिकरणविभक्त्यर्थयोरभेदस्य मुख्यवाक्यार्थत्वात्तद्योग्यार्थस्य विरुद्धार्थश्लेषमितिकामेदाध्यवसानेन + दः आपि
शब्देन च स्वसमभिव्याहृतैकपदार्थतावच्छेदकविरुद्धत्वमपरपदार्थतावच्छेदके द्योत्यते तत्र गमकद्वयसत्त्वात्प्रकरण
दैर्निमामकस्याभावाच्चार्थद्वयमपि युगपदवभासते · तत्रा + विशेषणत्वविरुद्धार्थस्य तत्रेति युक्तं · एवं च स्यापवि
रुद्धत्यागरणाभिन्नविशिष्टज्ञानाश्रय इति बोधः · अत्र त्वपि शब्दाभावस्तत्र प्रथमतः शब्दादन्वयबोधे जाते सहृदय
तावशाद्धितीयार्थोपस्थितौ विरहाद्युद्बोधकसहकृतैकसंबंधिज्ञाननिधया विरोधोपस्थितौ व्यंजनयैव तादृशबो

श्री० ३० 30 धइति · अत्र एवापि शब्दाभावे विरोधो व्यंग्य इत्याहुः विरोधस्याभासत्वे चाहार्यबोधविषयत्वात् स्वकार्यनिष्पादक
त्वाभावेनेति · रूपामत्वातिशयमात्रं विवक्ष्यत इति · ग्रंकार चूडापगेत्यात्र दे॥ विरोधाभास एवेति ध्येयमिति · एवं च विरो
धोनुपपत्तिश्चेद् गुणाद्रव्यक्रियादिषु · अमंदचंदनस्यंदः स्वच्छंदंदहतीह मामिति जयदेवोक्तविरोधो विरोधाभास एवेति
बोध्यं · विरोधश्चमत्कारमत्वमलंकारभावं वहतीति · अत्रेदं चिंत्यं · प्रतीयमानपरित्यत्रहि विरुद्धधर्मगततयास्वाश्रयमे
दकत्वस्यागोत्प्रेक्षायां विरुद्धत्वयावभासमानपदार्थानांश्लेषमित्तिकाभेदाध्यवसानेनाविरुद्धत्वादात्म्यापन्नानांसहवा
सोनिमित्तं · निमित्तप्रतिपादकेचोत्तरार्धं विरोधभानमंतरेणाविरुद्धधर्मैरपीत्याघुत्प्रेक्षायाअनुत्थानात्वेः एवं च निमित्तांशे
विरोधालंकारमुपजीव्यैव विरोधस्यागोत्प्रेक्षाश्रयीतरानुग्रहीतापश्चात्तत्समाधानत्वेनस्थितेत्युत्प्रेक्षांगमत्रविरोधइ
ति · इतिविरोधः साहृश्यमलेनेतिश्लेषमूलेनेत्यपि बोध्यं। कार्याभिन्नत्वचेति · शक्तकार्यद्विधाभावनाभिन्नतयेत्यर्थः
वस्तुतः सदृशावस्तुद्वयस्येति · इदं षष्ठ्यंतं पर्यवसानमित्यत्रान्वेति · तत्र सामानाधिकरण्येनेत्यंतं हेतुः। इयं च तावद्दे
धाशाब्दीआर्थीचेति · अत्र केचित् · शाब्दत्वेआद्या · आर्थत्वेऽन्यतराः पंच · तत्र द्वितीये कारणे कारणानवच्छेदकगुणादि राम०
वैकल्यदर्शनेनतदवच्छिन्नकारणाभावप्रतीतिरार्थी अस्तु वा शाब्दीतथापिस्वरूपतः कारणाभावकथनात्कारणाग ३०

त्रधर्मवैकल्यद्वारेणतद्विशिष्टकारणाभावकथनेनविच्छिन्नविशेषणत्वस्तेनप्रथमप्रकाराद्भिन्नोयस्यैवंलक्षणंयेनेत्यपास्तं·
त्तीयेप्रतिबंधकाभावस्यकारणत्वेनचेत्तदभावकथनेनशाब्दः·अभावाभावस्यप्रतियोगित्वेनये·तस्याकारणत्वेनयेऽभा
वस्यातिरिक्तत्वेनयेवात्रार्थः·आद्येभावोत्पत्तिपर्वस्माद्विशेषः चतुर्थ्यांप्रकृतसजातीयकार्योत्पत्तिरस्यकारणाभिन्नात्कथ
नमितिकारणाभावआर्थएव·षष्ठ्यांपंचम्यांप्रकृतकार्यविरुद्धकार्यस्यकारणात्कौरित्वाच्चतद्वृत्तिधर्मवदन्यथानामिति
इसआर्थएव·षष्ठ्यांतुकार्योत्पत्तिकारणस्येतिसएवेत्याहुः इतिविभावना·तादृश्यरूपकालीढः संगच्छतेइति·वैधर्म्य
स्यशब्दोपात्तत्वाद्भेदस्यप्रतीत्यसंभवाद्चमत्कारेभेदस्यैवप्रतीतेरस्यताद्रूप्यरूपकत्वव्यवहारइतिदिक्·नप्रागुक्तप्र
कारेणेति·प्रतियोगितावच्छेदकवैशिष्ट्येनानुत्पादप्रतिपादनाभावादित्यर्थः इतिविशेषोक्तिः·वैयधिकरण्यं·भिन्नदेश
त्वरूपं·भ्रमात्मकरोषानुमितीति·लीलयाकारणात्मभ्रमात्मकत्वं·श्लेषोपबृंहितेतिबंधनशब्देश्लेषः·जन्यत्वस्येष्टे
रिति·जन्यत्वेऽपिचिकीर्षायाःकृत्यान्यथासिद्धत्वमात्कार्यजनकत्वेमानाभावः अधिकरणान्तर्भावेनचिकीर्षायाअहेतु
त्वात्·अन्यत्रचिकीर्षितस्यापिप्रमादादिनान्यत्रकरणेव्यभिचारात्·एवंचतद्वैयधिकरण्यविरुद्धमेवेन·किंचात्रनका
र्यकारणवैयधिकरण्यकृतंभ्रमकारोऽपितुअन्यत्रकर्तव्यस्यान्यत्रकरणप्रयुक्तएवत्यर्थस्यसर्वसंमतत्वेनतत्तोद्देदौचित्या

श्री० र· किंच पूर्वोदाहरण इवानयोः कार्मकारणयोर्विरोधस्य दुःसमाधानत्वेन नात्र सः आपाततो विरुद्धत्वेन भासमानमे
३१ वहि तत्पूर्वासंगतिः रिति चिंत्य पंचमविभावनालक्षणाक्रांतत्वादिति· विरुद्धत्वेन प्रसिद्धयोरेव सेति केचित· किंचोपाले
31 भरूपेऽस्मिन्न्व चासि विरुद्धकृतिमानर्छतएव चमत्कारः तत्र तु विरोधनिवृत्तिकृतोपीति महान्विशेषः विरोधाभासत्वमु
चितमित्यामिति· समानविभक्तिकत्वाभावात्सामानाधिकरण्यस्य शब्दादप्रतीतेरभेदस्याभानाच्चचिंत्यं· ययोर्विरो
धप्रतीतिस्तयोरर्थांतरमादायापि सामानाधिकरण्याप्रतीतेश्च· इत्यसंगतिः अनिष्टकार्योत्पत्तिश्चेति त्राघेनाइष्ट
कार्योत्पत्तिशब्देन समासः द्वितीये इष्टशब्देन दुःखसाधनवस्तुनाशश्चेतीति· अत्रापि परस्येत्येव बोध्यं· नत्वपिशब्द
विवक्षणमिति· अपिशब्दस्यावाछिपदोत्तरमुक्तैर्वराणान्च ये तु न किंचिद्बाधकाक्षिपांतरस्याप्रयुक्तत्वादिति तेदध्याभ·
क्षित इत्यन्वपेत्विदं चिंत्यं· वाहुगतस्थिसंधिभंगरूपेति· तस्याधात्वर्थ· त्वात्भगवत्कर स्पर्शमहिम्नातस्याप्यजातत्वाच्चनेद
युक्तं· यत्तु कुटिलीभवनं तन्नातर्कितोत्करं· पर्वतधारणेतस्य संभावितत्वेन तदंगीकृतत्वात· गर्वेणगोपानाम प्रवृत्तेश्च खि
न्नोसीत्यु तस्यातथैवलाभाच्च० इति विषमं· यथा कथंचिदित्यर्थं त्यामिति· नवेति विभाषेतिसूत्रे हरतिभारमित्यत्राप्राप्तौ राम०
हृक्रोरितिविभाषेति विभाषेति भाष्योक्तेर्यथाकथंचि इत्यर्थानांतत्राग्रहाच्चिंत्यमेतत्· उच्चाटनं मांलंभयसे इतितु संयोगा ३१

नुकूलव्यापारानुकूलव्यापारार्थकत्वहसमानार्थाकत्वात्तरायं· तत्वमेऽस्कथितं चेतिसूत्रेणावोध्यं· संयोगानुकूलव्यापारो हि
लमेरर्थः गत्तीत्यादित्तिपमश्चपाचपत्यादिव्यावृत्याचरितार्थः अपवादस्यैव व्याप्यत्वादिति· अत्रेदं चिंत्यं· महतांसेवाविफ
लानेतिसूक्तिः तत्तोदूरनिरसनप्रापणरूपार्थान्तरपरिग्रहेणाविषमालंस्फूर्तिफर्वेकेनिंदायांपर्यवसाने· परस्परविषयपरि
हारेणाद्वयोः भावकौशल्यात्संकरएवोचितश्चेति· इतिसमं· वाक्यप्रयोक्तुरनुपहसनीयतापत्तेश्चेति· अत्रेदंचिंत्यं· स्वश
वादयोयद्विशेषणघटकास्तद्विशेष्यान्वितत्तद्विशेष्येतरावोधकत्वव्युत्पत्तेः समभिव्याहृतपदोपात्तवोधकत्वव्युत्पत्तेरे
वचानुभववलेनस्वीकारः नहि पचिकस्तद्विशेष्यान्वितइति· अनुदाहरणमेवेतदिति· स्वस्योपकारसत्वेपिपरस्परोपका
राप्यस्येवसनचमत्कारीतितुरिक्तं वचः किंचपथातथाशब्दव्यत्यासेनपूर्वोत्तरार्धव्यत्यासेनचास्यपुनःपाठेपरस्परोप
कारस्येवचमत्कृतस्यप्रतीतेस्तदभिप्रायेणोदाहरणत्वमेव· अपिचप्रकरणादिसहायेनापिपरस्परोपकारप्रतीति
श्चमत्कृतैवेतिचिंत्यमिदिक् इत्यन्योन्यं· कुवलयानंदोक्तमुदाहरणंगतार्थमिति· अशक्यवस्तुकरणोक्तताधिकचमत्का
रसत्वादिदंचिंत्यं· इतिविशेषः· लुब्धोनविसृजतीत्युदाहरणेतात्कालिकजन्मांतरीयदारिद्र्यशंकयोरभेदाध्यवसाना
त्तलक्षणासमन्वयइत्याहुः इतिव्याघातः· यदुक्तं कुवलयानंदकृताज्ञातिमात्रमितिः तत्रापिदीपकशब्दस्योपकारकप

रत्वं· अत एव जैत्रदीपकप्रकरणात्स्यप्यगेकावल्गु· त्तरमुक्तोपमम् इत्येतदुक्तिवरे व भ्रांता इत्येकावली· अर्थान्तरन्यासे स्या
द्वाति प्रसक्तमिति· प्राचीनमन्ते समतेस मर्थनीयस्येत्यनेनैव वारणात्· मतान्तरेतु सामान्यविशेषभावानालिंगितत्वं दृप
मिति अर्थान्तरन्यासप्रकरणोत्तद्व्य एव स्फुटं· पर्वपक्षेनुमितिर्गम्या इह पुनर्वुध्यते वाच्येति· अत्रेदं चिन्त्यं· एवं हि काव्यलिंगमा
त्रेगम्यानुमानस्य सत्वेन तदुच्छेदापत्तेः तस्मादनुमितेर्बोधनेसाम्यत्रापमितिव्यवस्थाश्रयणान्न दोषः· अत्र मग्नक्रांतारित गत इति क्रि
पाक्रेनर्भावितए पर्याः तादृशक्रियाकर्मीभूतेंद्रीवरादभेदे वनिष्ठत्व सादृश्यदर्शनजन्यसुखासहिष्णुत्वोपपादका· प्रजितत्वाद्यु
पपादकानि चत्वन्नेत्रसमानकांतीत्यादीकानीति वोध्यं· इति काव्यलिंग· करिः श्रृणोतीति· कविनिवद्धप्रमात्रंतरनिष्ठाद्यनुमि
तिरनुमानालंकारस्याविषय इत्यादिना काव्यलिंगालंकारे दत्तोपत्तरत्वादिति भावः· अर्थान्तरन्यासप्रभेदयोश्चसंस्पृष्टेवेति· इंएव
त्वाहृकृत चमत्कारस्याधिकस्य सत्वाच्चिन्त्यमिदं· इत्यर्थान्तरन्यासः तस्मादत्रैकविषयः सारालंकारश्चवित इति अत्रेदं चिंत्यं· भेदप्र
तीतौ सत्यामेव सार इत्यस्य प्राचीनसंमतत्वेनतदभात्· अत्र हि रागयोः श्लेषेणाभेदाध्यवसामात्· वर्धमानकरूपालंकारांतरस्वीकारा·
पेक्षया पर्यायपदार्थस्यसाधारणपमाश्रित्यानेन संग्रहस्यैवोचितत्वाच्च· अत एव प्रकाशकृतापीदं पद्यं पर्यायेऽदाहृतं· यत्र पूर्वं घटः स्त
त्राधुनापट इतिवल्लौकिकोक्तिमात्रमिति· अत्रेदं चिंत्यं· गभीरजलस्यस्रोतस्त्वनाल्पजलविद्यमानतायां मुशाकगमनत्वेनाकविनापुलिनत्वा

श्री० ३३

33

रोपेउदाहरणत्वं सम्भवेदेवेति । अर्थापत्त्यलंकारे न तु कैमुतिकन्यायेनेत्यादि । अत्रेदं चिन्त्यं तावदग्रे मदीत्यत्र वस्तुमात्रा
संभावनापद्यतिर्य्यातिशयोक्तिर्वालंकारः । न च पद्यर्यातिशयोक्तावाक्याघापादकयोर्न्नि परीतार्थ्यनिश्चायकत्वमिह तु आ
पादकस्यासिद्धत्वादर्थापादस्य संभाव्यमानत्वमिति विशेष इति वाच्यम् अनत्वाधिक्यादिभिरर्थापत्तिमदस्यत्वमाकल्पनवत्
तस्याप्येवं तथाविधभेदप्रकल्पने ऽसम्भावात् । न च कैमुत्येन सिद्धिरपि न्नेद एवास्तु । प्राचामनुरोधेनाभिन्नतयोक्तेरिति ॥

राम० ३३

काव्य

११००